१ श्रीगणेशगुरुदक्षिणामूर्तिभ्यो नमः सांबशिवं नमस्कृत्य महादेवः सतां मुदे विचारयत्यनुमितौ पक्षतां हेतुतां स्फुटं १ तार्किकैः पक्षता सम्यक्लक्षिता
यद्यपि स्फुटं तथाप्यत्र चमत्कारः सतां स्फुटीभविष्यति २ सम्यक्परामर्शादिसकलानुमितिकारणसमवधाने पर्वतो वह्निमानित्यादिनिर्णयदशायामनुमितेर
नुत्पत्त्याऽनुमितिं प्रति पक्षता हेतुरिति सकलनैयायिकसिद्धान्तः तत्र सिसाधयिषाविरहविशिष्टसिद्ध्यभाव एव पक्षतेति मणिकृतः तथा च पर्वतो वह्निव्यापकवह्नि
लिङ्गकानुमितिं प्रति अनुमित्साविरहविशिष्टपर्वतविशेष्यकवह्निप्रकारकनिर्णयत्वावच्छिन्नाभावत्वरूपपक्षतात्वेन हेतुत्वं एवमग्रेऽपीति फलितं अत्र
च गुरवः पर्वतो वह्निमानित्यादिनिर्णये पर्वतो वह्निमानित्याद्यनुमित्यनुत्पादेऽपि साध्यनिर्णयेन यादृशानुमितिं प्रति तादृशनिर्णयाभावत्वेन हेतुत्वकल्पनं
निर्युक्तिकमेव तव मते तथाविधकार्यकारणभावकल्पने एकवारोत्पन्नपर्वतो वह्निमानित्याद्यनुमितिव्यक्तेः पुनरुत्पादापत्तिर्दुर्वारा तथाविधकार्य
कारणभावकल्पने तु पर्वतो वह्निमानित्याद्यनुमित्युत्पत्तिकाले पर्वतो वह्निमानित्यादिनिर्णयाभावासत्त्वेन सामान्यसामग्र्यभावान्न तदनन्तरं पुनस्तद्व्यक्तेः पुन
रुत्पादनं संभवतीति तथाविधकार्यकारणभावकल्पनमावश्यकं न च व्यक्तियौर्वापर्यनिर्वाहाय तद्रूपं तदनन्तरानुमितिव्यक्तिं प्रति तत्तत्स्वव्यवहितपूर्ववस
त्वकानां तत्तद्व्यक्तित्वेन हेतुत्वस्य कल्पनीयतया तेनैवोत्पन्नानुमितिव्यक्तेरपि पुनरुत्पादापत्तिवारणसंभवेऽपीति सामान्यकार्यकारणभावक ग०प० १
ल्पनं निर्युक्तिकमेवेति वाच्यं व्यक्तिस्थानीयापत्तिवारणाय तत्तदनुमितिव्यक्तिं प्रति तत्तत्परामर्शस्य तत्तद्व्यक्तित्वेन विशेषहेतुतायाः आवश्यकत्वेन तथैव

व्यक्तिपौर्वापर्यस्यापिनिर्वाहसंभवेनतथैवतत्तज्जन्यानुमितिंप्रतितत्तद्व्यक्तित्वेनहेतुत्वक्षणव्यक्तीनांनानात्वव्यक्तित्वेनहेतुत्वकल्पनस्यानिर्युक्तिकत्वात्तथादृशिनादृशोत्पन्ना
नुमितिव्यक्तेःपुनरुत्पादापत्तिवारणस्याशक्यतयातादृशसामान्यकार्यकारणभावकल्पनस्यसयुक्तिकत्वात्। नचव्यक्तिस्थानीयापत्तिवारककार्यकारणभा
वेनैवोत्पन्नव्यक्तीनांपुनरुत्पादापत्तिर्वापिवारणीयेतिवाच्यं परामर्शस्यतृतीयक्षणएवनाशेनतद्द्वितीयक्षणोत्पन्नानुमितिव्यक्तिसमयेतस्यसत्वेनतदुत्तरंत
द्व्यक्तेःपुनरुत्पादापत्तिवारणस्यतत्कार्यकारणभावेनाशक्यत्वात्। नचोत्पन्नानुमितिव्यक्तेःपुनरुत्पादापत्तिवारणायतत्तदनुमितिव्यक्तिंप्रतितत्तदनुमिति
प्रागभावादीनामेवहेतुत्वंयुक्तमङ्गीकरणीयमितिवाच्यं। तैःप्रागभावानङ्गीकारेणतथाविधानंतत्कार्यकारणभावकल्पनेगौरवप्रसंगेनचपर्वतोवह्निमानित्या
द्यनुमितिंप्रतिपर्वतोवह्निमानित्यादिनिर्णयभावत्वेनहेतुत्वकल्पनस्यैवोचितत्वात्। अथयस्मिन्क्षणेपरामर्शादिघटितानुमितिसामग्रीतत्तद्वितीयक्षणेऽव
श्यमनुमितिसत्वमित्युत्पत्तिघटितसामग्रीव्याप्तिस्वीकारेणोत्पन्नानुमितिव्यक्तेर्नपुनरुत्पादापत्तिः तद्व्यक्तेःद्वितीयक्षणेसत्वापत्तेस्त्विष्टापत्तिरेव। नचैवंसामा
न्यलक्षणायांप्रागभावस्वंउनावसरेउत्पन्नपुनरुत्पादरक्तकार्यादेःप्रतिबंधकत्वेनापिनिरसनीयत्वमितिबोधितग्रंथासंगतिरितिवाच्यं। तर्कनिर्णयेर्थेन्यथविरोध
स्यतार्किकैरनादरणीयत्वात्। अपिशब्देनउत्पत्तिघटितसामग्रीव्याप्तिस्वीकारेणापरर्थिनप्रतिबंधकत्वाभावस्यस्वचनाद्वेतिचेन्न। तथासत्यपिवह्निव्याप्य
धूमवान्पर्वतःअयमेकोघटःअयमेकोघटःअयमेकोघटइत्याद्यपेक्षाबुद्ध्याधारात्मकपरामर्शद्वितीयादिक्षणोत्पन्नानुमितिव्यक्तेःपरामर्शचतुर्थक्षणेसत्वापत्ते

पक्षतायाः हेतुः समाधेयत्वात् यत्तु तादात्म्यसंबंधेनानुमितित्वावच्छिन्नं प्रति प्रतियोगितासंबंधेन प्रागभावस्य हेतुत्वकल्पनेनोक्तस्थानेनुमितिरिति चक्र्युक्तेः पुनस्तदापत्तिर्वारणीयाः
२
मत्तत्र तदा प्रतियोगितासंबंधेन प्रागभावासत्वात् अथ तादात्म्यसंबंधस्य कार्य्यतावच्छेदकत्वे कारणतालक्षणानुपपत्तिः तथाहि अनन्यथासिद्धत्वे सति कार्य्यता
वच्छेदकसंसंबंधेन कार्याधिकरणे कार्याव्यवहितपूर्वक्षणावच्छेदेन वर्त्तते यो भावस्तत्प्रतियोगितानवच्छेदकधर्मवत्त्वं कारणत्वं तादात्म्यसंबंधस्य कार्यतावच्छेदक
संबंधत्वे चावच्छेद्याधिकरणोः संबद्धस्य क्षणस्यानवच्छेदकत्वनियमेन तेन संबंधेन कार्यसंबंधिनि कार्ये कार्याव्यवहितपूर्वक्षणावच्छेदेन वर्त्तमानस्याभावस्याप्रसिद्ध्या
तद्घटितकारणतालक्षणानुपपत्तिः स्फुटैवेति चिन्त्यं कार्याव्यवहितोत्तरक्षणोत्पत्तिकत्वसामानाधिकरण्योभयसंबंधावच्छिन्नायाः कार्यनिष्ठभेदप्रतियोगितावच्छेदक
तानवच्छेदकधर्मवत्त्वविशिष्टानन्यथासिद्धत्वस्यैव कारणतापदार्थत्वात् सामानाधिकरण्यं च कारणतानवच्छेदकसंबंधेन यत्स्वाधिकरणं तन्निरूपितका
र्यतावच्छेदकसंबंधावच्छिन्नवृत्तित्वरूपं ग्राह्यं तथा च प्रकृते तत्स्थलेनुमितिरूपकार्ये प्रतियोगित्वतादात्म्योभयघटितसामानाधिकरण्यस्याव्यवहितोत्तरक्षणो
त्पत्तिकत्वोभयसंबंधेन प्रागभावस्य सत्वात् नहि विशिष्टभेदासत्वेनोपदर्शितोभयसंबंधावच्छिन्नतथाविधप्रतियोगितावच्छेदकतानवच्छेदकधर्मवत्त्वरूपकारणत्वस्य
प्रागभावेक्षतत्वान्नानुपपत्तिरिति तदसत् तथापि समवायसंबंधेनोक्तस्थानेनुमित्युक्तेः पुनस्तदापत्तेर्वारणासंभवात् न च परामर्शेणानुमितिरूपफलजननीये राम०
प्रतियोगितासंबंधेन प्रागभावस्य सहकारित्वकल्पनेनोपदर्शितानुपपत्तिरिति वाच्यं प्रतियोगितासंबंधेन प्रागभावस्यापि घटादौ सत्वात्तत्स्थानेनुमित्युक्तेः पुन २

हत्वाद्यापत्तिवारणायानुमितिं प्रति सिध्यभावस्य हेतुत्वकल्पनमावश्यकमिति चेन्नैवं। पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति तादृशानुमित्यभावत्वेन हे-
तुत्वकल्पने पूर्वोत्पन्नानुमितिव्यक्तेः पुनरुत्पत्त्यापत्तिवारणासंभवेन। तादृशानुमितिं प्रति अनुमित्साविरहविशिष्टपर्वतत्वावच्छिन्नविशेष्यकवह्न्यादि-
प्रकारकनिर्णयत्वरूपगुरुधर्मावच्छिन्नाभावत्वेन हेतुत्वकल्पने प्रयोजनाभावेन तादृशानुमितिं प्रति तादृशनिर्णयत्वावच्छिन्नाभावत्वेन हेतुत्वकल्पनस्य
नैयायिकमतसिद्धस्य निर्युक्तिकत्वात्। वस्तुतस्तु तादृशानुमितिं प्रति तथाविधनिर्णयत्वावच्छिन्नाभावत्वेन हेतुत्वकल्पनेऽपि न हेतुतावच्छेदककोटावप्रा-
माण्यग्रहाभावोऽवश्यं निवेश्यः। अन्यथाऽप्रामाण्यग्रहकाले पर्वतो वह्निमानित्याहिनिर्णयसत्त्वे पर्वतो वह्निमानित्याद्यनुमितेरनुदयप्रसंगात्। तथा चा-
प्रामाण्यग्रहकाले उत्पन्नानुमितिव्यक्तेः पुनरुत्पत्त्यापत्तिर्न तेन वारयितुं शक्यत इति तद्वारणाय तत्तदनुमितिं प्रति तत्तदनुमितिप्रागभावस्य हेतुत्वं तथावि-
धनिर्णयत्वावच्छिन्नप्रतियोगिताकाभावहेतुत्ववादिनाप्यवश्यं कल्पनीयमिति तेनैव सर्वसामंजस्ये पर्वतो वह्निमानिति साध्यनुमितिं प्रति पर्वतो वह्निमानित्या-
द्यनुमित्यभावत्वेनापि हेतुत्वकल्पने प्रयोजनाभाव इति। यत्तु पर्वतो वह्निमानिति साध्यनुमितिं प्रति पर्वतो वह्निमानित्याहिनिर्णयाभावत्वेन हेतुत्वकल्पने पर्वतो
वह्निमानित्याद्यनुमितिं प्रत्यनुमित्साविरहविशिष्टविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षेच्छाविशिष्टवह्निमत्पर्वतवानहमित्यादिशिष्टवैशिष्ट्यबोधात्मकप्र-
त्यक्षसामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इति लाघवं। तादृशप्रत्यक्षसामग्रीकाले विशेषणतावच्छेदकप्रकारकनिर्णयविधया पर्वतो वह्निमानित्याहिनिर्णयसत्त्व

स्तावार ३

स्यावश्यपतया तादृशनिर्णयाभावरूपकारणासत्त्वादेवानुमितिवारणासंभवात् तथाविधहेतुत्वानंगीकारे तु तादृशानुमितिवारणाय तादृशप्रतिबंधकताकल्पन
मावश्यकमिति महागौरवमिति तथाविधकार्यकारणभावकल्पनमेव सम्यगिति तन्न तादृशकार्यकारणभावाकल्पनेऽपि पर्वतो वह्निमानित्याद्यनुमितिं प्रति ता
दृशप्रत्यक्षसामग्र्याः स्वतंत्रप्रतिबंधकत्वाकल्पनेन तादृशकार्यकारणभावकल्पने उपदर्शितलाघवस्यासंभवात् तथाहि तादृशकार्यकारणभावकल्पनेऽपि पर्
वतो वह्निमानित्याद्यनुमितिं प्रति तादृशसामग्र्याः प्रतिबंधकत्वमवश्यं कल्पनीयं तादृशानुमितेः पर्वतो वह्निमानित्यादिनिर्णयाभावजन्यतावच्छेदकानाक्रांतत्वात् ता
दृशानुमितौ तादृशनिर्णयाभावस्य कारणत्वासंभवेन तादृशनिर्णयघटितोक्तप्रत्यक्षसामग्रीदशायां तादृशनिर्णयाभावरूपकारणासत्त्वप्रयोज्यस्य ता
दृशानुमितिवारणस्यासंभवात् एवं च तादृशानुमितौ तादृशसामग्र्याः प्रतिबंधकत्वे कल्पनीये तत्र वह्न्यभावत्वादिरूपविशेष्यतावच्छेदकमनिवेश्य वन्ह्या
दिविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेन वन्ह्यादिविधेयकानुमितिं प्रति निरुक्तीयानुमितिनिष्ठविशेष्यतानिरूपितविशेष्यकत्वप्रकारतानि
रूपितावच्छिन्नप्रकारतानिरूपितप्रकारतासंबंधावच्छिन्नप्रतियोगिताकानुमितीच्छाभावविशिष्टतादृशप्रत्यक्षेच्छाविशिष्टतादृशप्रत्यक्षसामग्र्याः
प्रतिबंधकत्वकल्पनेनैव तादृशप्रत्यक्षसामग्रीकाले पर्वतो वह्निमानित्याद्यनुमितेरपि वारणासंभवेन तादृशानुमितिं प्रति तादृशप्रत्यक्षसामग्र्याः प्रतिबंध राम० ३
कत्वस्यानंत्येन कल्पनमित्युक्ततादृशकार्यकारणभावानंगीकृतमते गौरवावकाश इति न जानीमः नचैवमपि तादृशप्रत्यक्षसामग्रीकालेऽपि पर्वतो वह्निमा

नित्याद्यनुमित्यापत्तिर्दुर्वारा इतरकारणीविशिष्टविशेषणतावच्छेदकप्रकारकनिर्णयत्मिकायास्तादृशप्रत्यक्षसामग्र्या आत्मन्येव सत्वे न पर्वतत्वादौ तदभावस्य
सर्वदा सत्वादिति वाच्यं। एककालीनत्वसंबंधेन तादृशप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनेनैककालीनत्वसंबंधेन तादृशप्रत्यक्षसामग्रीविशिष्टस्योपदर्शितसंबं
धावच्छिन्नप्रतियोगिताकानुमित्यभावस्य वा प्रतिबंधकत्वकल्पनेनोक्तापत्तेरभावात् न चैकपुरुषीयतादृशप्रत्यक्षसामग्रीकाले पुरुषांतरीयतथाविधानुमिति
सामग्रीकाले पुरुषांतरस्यानुमित्यनुपपत्तिरिति वाच्यं। तत्तत्पुरुषीयत्वेन विशेषे वप्रतिवध्यप्रतिबंधकभावकल्पनानानन चैवं विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या प्रतिब
ध्यप्रतिबंधकभावकल्पनपेक्षया गौरवमिति वाच्यं। तत्तत्पुरुषीयत्वादेरपि विशेष्यतावच्छेदकतया आत्मनिष्ठप्रत्यासत्त्या प्रतिबध्यप्रतिबंधकभावकल्पनेपि पुरु
षभेदेन कार्यकारणभावस्यावश्यकत्वात् पर्वतत्वादिरूपविशेष्यतावच्छेदकभेदेन प्रतिवध्यप्रतिबंधकभावकल्पनायाः पुनराधिक्येन विशेष्यतावच्छेदकनिष्ठप्रत्या
सत्त्या प्रतिवध्यप्रतिबंधकभावकल्पने लाघवस्यानपायात् किंच पर्वतो वह्निमानित्यादिनिर्णयसत्वे पर्वतविशेष्यकवह्निप्रकारकज्ञानं जायतामितीच्छास
त्वे पर्वतो वह्निमानित्याद्यनुमितेरुदयेन पर्वतो वह्निमानित्याद्यनुमितिं प्रति पर्वतविशेष्यकवह्निप्रकारकानुमित्यादिविषयकेच्छाविरहविशिष्टपर्वतो वह्निमा
नित्याद्यनुमितिं प्रति पर्वतविशेष्यकवह्निप्रकारकानुमित्यादिविषयकेच्छाविरहविशिष्टपर्वतो वह्निमानित्यादिनिर्णयाभावत्वेनैव कारणता कल्पनीया।
तथा च पर्वतो वह्निमानित्यादिविशेषणतावच्छेदकप्रकारकनिर्णयघटिततथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामग्रीकाले विशिष्टवैशिष्ट्यावगाहित्वम

पक्षतावाद

४ क्षत्वस्य प्रकारकेच्छादशायां पर्वतेन विशेष्यकवह्निप्रकारकज्ञानं जायतामित्यादीच्छासत्त्वे तथाविधानुमितिविषयकेच्छाविरहविशिष्टनिर्णयाभावस्य सत्त्वेन तद्घटितसाम
ग्रीबलादनुमित्यापत्तिवारणाय अनुमितिं प्रति तादृशपक्षेच्छाविशिष्टतादृशपक्षतासामग्र्याः प्रतिबंधकत्वमुपदर्शितनिर्णयाभावकारणतावादिनापि अवश्यं कल्पनी
यमिति तन्मते नोपदर्शितलाघवावकाशः अथ तथाविधसामग्र्यास्त्वनुमित्साविरहविशिष्टाया एव तादृशानुमितौ प्रतिबंधकत्वं कल्पनीयं। अन्यथानुमित्साका
ले तादृशपक्षतासामग्रीसत्त्वे नुमित्यनुदयापत्तेः तथा च पर्वतेन विशेष्यकवह्निप्रकारकज्ञानं जायतामितीच्छासत्त्वे उपदर्शितविशिष्टवैशिष्ट्यावगाहिपक्षतासामग्रीदशा
यां अनुमितिविषयकेच्छाविरहविशिष्टतथाविधपक्षतासामग्र्यभावसत्त्वेन तदानुमित्यापत्तिः तादृशसामग्र्यभावत्वेन हेतुत्वकल्पनेपि दुर्वारेति चेन्न तथाविधानुमिति
प्रत्यनुमितित्वप्रकारकेच्छाभावविशिष्टायास्तादृशपक्षतासामग्र्याः प्रतिबंधकत्वकल्पनेनानुपपत्त्यभावात् तत्कल्पने तु ज्ञानद्वयोपस्थापकांशे गौरवेण तथाविधा
नुमितिं प्रति तादृशपक्षतासामग्र्याः प्रतिबंधकत्वकल्पनमेव नास्तिकस्तन्मते अनुमितिं प्रति पक्षतायाः अहेतुत्वेपि तादृशानुमितिं प्रति तादृशपक्षतासामग्र्याः प्र
तिबंधकत्वकल्पनप्रयुक्तगौरवावकाश इति न जानीमहे। यद्यपि नैयायिकमते पर्वतो वह्निमानित्याद्यनुमितिं प्रति पर्वतो वह्निमानित्यादिनिर्णयाभावत्वेन कारणता
कल्पनं नाधिकं। पर्वतादिविशेष्यकवह्न्यभावादिप्रकारकबुद्धिं प्रति पर्वतादिविशेष्यकवह्न्यादिप्रकारकनिर्णयस्य बाधनिर्णयमुद्रया प्रतिबंधकत्वे कल्पनीये तत्रैव ता राम०
दृशबुद्धित्वमनिवेश्य स्वाश्रयवह्नितोन्नरक्षणाय निरूपकत्वस्वसामानाधिकरण्योभयसंबंधेन तादृशबाधनिर्णयविशिष्टयद्यज्जहिन्नत्वावच्छिन्नं प्रत्येव तादृशबाधनिर्णयाभा ४

वत्वेन हेतुत्वस्य कल्पनेन न क्षतिः यद्वा नैवं तन्निर्वाहात्। न चोपदर्शितस्थले तादृशबाधनिर्णयाभावकार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिसंबंधेन तादृश
बाधनिर्णयविशिष्टोपधत्तभिन्नत्वमिति विशेषणेनैव गौरवमिति वाच्यं। तत्र तन्निवेशे तादृशबाधनिर्णयसत्वे पर्वतादिविशेष्यकवह्न्यभावादिप्रकारकेच्छासत्वेन पर्वतादि
विशेष्यकवह्न्यभावादिप्रकारकाहार्यप्रत्यक्षोदयेन तत्र व्यभिचारवारणाय तादृशबाधनिर्णयप्रतिबंधकतायां तादृशेच्छाया उत्तेजकत्वकल्पनस्यावश्यकतया
तादृशेच्छाभावस्यापाप्रामाण्यापहितानाभावादिभिः समं विशेषणविशेष्यभावे विनिगमनाविरहात् प्रतिबध्यप्रतिबंधकभावद्वये हि त्ववच्छेदकगौरवं च। तत्र तन्निवेशे
न त्वाहार्यप्रत्यक्षस्य तादृशबाधनिर्णयाभावकार्यतावच्छेदकानाक्रान्तत्वेन व्यभिचाराभावेन तादृशेच्छाया उत्तेजकत्वेनोपदर्शितरीत्या प्रतिबध्यप्रतिबंधक
भावद्वये हि त्ववच्छेदकगौरवस्य चाभावेन लाघवमिति तन्निवेशे न गौरवाभावात्। न च तत्रोपदर्शितरीत्या इच्छाया उत्तेजकत्वकल्पनमावश्यकं। अन्यथा कार्यता
वच्छेदककोटौ तादृशबाधनिर्णयविशिष्टान्यत्वनिवेशपक्षे प्रतिबंधकतायामिच्छाया अनुत्तेजकत्वे इच्छाकाले बाधनिर्णयसत्वे तादृशसामग्रीबलात् पर्वतो
वह्न्यभाववानित्यादिविशिष्टबुद्धिरुत्पद्यते इच्छाशून्यकालेपि तादृशबाधनिर्णयदशायां तादृशसामग्र्याः प्रसन्नतया तद्बलात्तथाविधविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वादिति
वाच्यं। स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबंधेन पर्वतादिविशेष्यकवह्न्यभावादिप्रकारकेच्छाविशिष्टान्यतादृशबाधनिर्णयद
शायां तादृशसामग्र्याः प्रसन्नतया तद्बलात्तथाविधविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वादिति वाच्यं। स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबंधेन पर्वतादि

५ शेष्यकत्वस्वभावादिप्रकारकेच्छाविशिष्टंप्रतितादृशवह्न्यभावादिप्रकारकेच्छायाअपिकारणत्वकल्पनेनोक्तापत्त्यसंभवात्नचकार्यतावच्छेदककोटौतादृश
बाधनिर्णयविविशिष्टान्यत्वविनिवेशनंतादृशेच्छाविशिष्टंप्रतितादृशेच्छायाःकारणत्वेतत्कल्पकेनंचापेक्षतादृशबाधनिर्णयप्रतिबंधकतायांतादृशेच्छा
याउत्तेजकत्वेएवलाघवमितिवाच्यंतादृशेच्छाभावेनसममप्रामाण्यग्रहाभावस्यविशेषणविशेष्यभावेविनिगमनाविरहेणाप्रतिबध्यप्रतिबंधकभावद्वि
हिः प्रतिबंधकतावच्छेदकशरीरस्यमहागौरवग्रस्ततावेतितत्स्थेक्ष्यकार्यतावच्छेदककोटौतन्निवेशस्यतादृशेच्छायाःस्वातंत्र्येणकारणत्वेनकल्प
नस्यैवोचितत्वात् तथाचकृमेनैवानुमितिंप्रतिपक्षतायाहेतुत्वेननिर्वाहेगौरवाभावेनबाधकाभावेनानुमितिंप्रतिपक्षतायाहेतुत्वंकेनवारणीयमिति
तदपिन तथापिसिद्धिकालेपर्वतेवह्न्यनुमितिर्जायतामितीच्छासत्त्वेयादृशसामग्रीबलात्पर्वतेवह्न्यनुमितिरुत्पन्नातादृशसामग्रीबलादनुमित्युत्प
कालेपिसिद्धिदशायामनुमित्यापत्तेर्वारणायतथाविधानुमित्साविशिष्टंप्रतितथाविधानुमित्सात्वेनापिहेतुताकल्पनस्यावश्यकतयातद्राधिक्यप्रयु
क्तगौरवस्यवारयितुमशक्यत्वात् नचपर्वतेवह्न्यनुमितिर्जायतामितीच्छाविशिष्टंप्रतितथाविधेच्छात्वेनहेतुत्वेपर्वतोवह्निमानित्यनुमितिंप्रतिपर्व
तोवह्निमानितिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधकत्वमपितथाविधेच्छामनुत्तेजकीकृत्यकल्प्यतेतत्रापिस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामाना राम०
धिकरण्योभयसंबंधेनतथाविधानुमित्साविशिष्टेपत्तिभिन्नत्वस्यैवप्रतिबध्यतावच्छेदकत्वोपगमेनव्यभिचाराभावात् तथाचलाघवकाशलादृशेच्छाहेतु ५

त्ववादिमतेइतिवाच्यं॰तथापिसिद्धिकालीनाननुगतानुमितिजापत्तामितीच्छानांतत्तद्व्यक्तित्वेनहेतुत्वकल्पनेमहद्गौरवमस्यत्रत्नतोपिपूर्वोक्तत्वात्तयदि
चतादृशेच्छाव्यवहितोत्तरक्षणोत्पन्नसंयोगादिव्यक्तीनामनुत्पत्त्यापत्तिवारणायतत्रतत्संयोगादिकंप्रतितत्तदव्यवहितपूर्वक्षणानांतत्तद्व्यक्तित्वेनहे
तुत्वंकल्पनीयंविनिगमनाविरहेणात्तर्हिइच्छाया अपितत्तद्व्यक्तित्वेनहेतुतायाआवश्यकतयातत्रानुमित्यादिसाधारणांस्वाव्यवहितोत्तरक्षणोत्प
त्तिकत्वसंबंधेनतत्तदिच्छाविशिष्टत्वमेवतासांकार्यतावच्छेदकमभ्युपेयते:अन्यथानंततत्तत्संयोगत्वादे:कार्यतावच्छेदकत्वेगौरवप्रसंगात्॰तथा
चपक्षताहेतुत्वमतेनतदनुगतेच्छानांस्वातंत्र्येणहेतुताकल्पनप्रयुक्तगौरवावकाशइतिविभाव्यतेतथापिपर्वतोवह्निमानित्याद्यनुमित्युत्पादकवह्निव्याप्य
धूमवान्पर्वतइत्यादिपरामर्शादिघटितसामग्र्यांपर्वतोवह्निमानित्यादिनिर्णयाभावनिवेशप्रयुक्तगौरवंपक्षताहेतुत्ववादिमतेदुरुद्धरमेव:अथानुमिति
प्रतिसिद्धेःप्रतिबंधकत्वेलिंगोपहितलैंगिकभानाभ्युपगमेनग्रहणादिपर्यंतंअनुमितिधारोत्पत्तिप्रसक्ति:संपेततत्कश्चिदभ्युपेतितथाननुभवादिनिपक्षताहे
तुत्वेतद्विशेष्यकतत्प्रकारकानुमितित्वाभावत्वेनकारणताकल्पनेनैवोपदर्शितानावश्यकमेवेतिचेन्न॰लिंगोपहितलैंगिकभानेप्रमाणाभावात्॰तद्वि
शेष्यकतत्प्रकारकानुमितित्वापत्तिवारणासंभवेगुरुतरप्रत्यक्षादिसाधारणतथाविधनिर्णयत्वावच्छिन्नाभावत्वेनकारणताकल्पनेप्रयोजनाभावा

६ ध्येतिवदंति । अत्र नैयायिकाः । अनुमितिं प्रति सिद्ध्यभावत्वेनाहेतुत्वे सिद्धिकालिकाहार्यपरामर्शादनुमितिवारणायानुमितिं प्रति परामर्शजनकतावच्छेदककोटौ
सिद्धिकालीनतत्तदनंताहार्यपरामर्शव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वमप्रवेश्यं निवेश्यं । अनुगताहार्यत्वस्य प्रवेशोप्यशक्यनिर्व
चनतयाहार्यत्वावछिन्नप्रतियोगिताकभेदरूपानाहार्यत्वस्य जनकतावच्छेदककोटौ निवेशासंभवेन सर्वत्र तत्तद्व्यक्तित्वावछिन्नप्रतियोगिताकभेदकूटवत्त्व
रूपानाहार्यत्वस्यैव जनकतावच्छेदककोटौ निवेशात् । एवं च तेषां भेदानामाहार्यतत्तद्व्यक्तित्वावछिन्नप्रतियोगिताकभेदानां प्रामाण्यज्ञानाभावादि
भिः समं विशेषणविशेष्यभावे विनिगमनाविरहेणानंतकार्यकारणभावानंतकारणतावच्छेदकशरीरधिकाप्रयुक्तगौरवं दुष्परिहरमेवं अनुमितिं प्रति
सिद्धेः प्रतिबंधकत्वे तु तदा सिद्ध्यभावरूपकारणाभावादेवानुमित्यनुत्पादनिर्वाहे सोक्तापत्तिविरहेण सिद्धिकालीनाहार्यपरामर्शव्यक्तीनां तत्तद्व्यक्तित्वाव
च्छिन्नप्रतियोगिताकभेदकूटस्य परामर्शनिष्ठानुमितिजनकतावच्छेदककोटौ निवेशाभावेनोपदर्शितरीत्या गौरवानवकाशेन लाघवमिति पक्षताहेतुत्व
मावश्यकं । किंच सिद्ध्यभावस्यानुमितौ कारणत्वे सिद्धिकाले ह्यनुमित्यनुत्पादेऽपि सिद्धिकाले आहार्यबाधतदभावव्याप्यवत्ताज्ञानादिसत्त्वे परामर्शान्तरानु
मित्युत्पादकसामग्रीसत्त्वेनुमितेरुत्पादेन तत्रानुमितिं प्रति बाधतदभावव्याप्यवत्ताज्ञानाद्यभावजनकतायां व्यभिचारवारणाय जनकतावच्छेदककोटौ सिद्धिकालीना राम
नंततत्तदाहार्यबाधतदभावव्याप्यवत्ताज्ञानादिव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदा बाधतदभावव्याप्यवत्ताज्ञानाद्यभाववत्त्वं निवेशनीया । तथा च ६

षांतादृशभेदारोपंतं प्रामाण्यज्ञानाभावादिभिः समं विशेषणविशेष्यभावे विनिगमनाविरहेण नंतकारणाभावापत्त्याकारणस्यैष्या नावच्छेदकशरीरप्रवेशाचेगौ
रवं दुरुद्धरं । अनुमितिं प्रति सिद्धेः प्रतिबंधकत्वे नुमितिकाले आहार्यबाधबुध्यादिसत्वे नुमितेरनुरोधेनानुमितिं प्रति बाधाभावकारणतायां व्यभिचाराभावेना
नंतोपदर्शितभेदानां तत्कारणतावच्छेदककोटौ निवेशप्रयोजनाभावेन लाघवमिति पुनरनुमितौ सिध्यभावहेतुत्वे सिद्धेनुमितौ पक्षताहेतुत्वसिद्धिः केनवा
रणीयेति । केचित्तु पक्षताया अनुमितिहेतुत्वे वन्ह्यादिलिंगकवन्ह्यादिसाध्यकानुमितीच्छाविनापि वन्ह्यादिलिंगकवन्ह्यादिसाध्यकानुमितेरुदयस्यावश्यक
त्वाद्वन्ह्यादिलौकिकप्रत्यक्षादिसामग्रीदशायां वह्निव्याप्यवह्निमान्पर्वत इत्यादिपरामर्शघटितानुमितिसामग्रीवत्वाद्वन्ह्यादिलिंगकवन्ह्यादिसाध्यकानुमितेरुत्पत्ति
वारणाय वन्ह्यादिलिंगकवन्ह्यादिसाध्यकानुमितौ वन्ह्यादिलिंगकवन्ह्यादिसाध्यकानुमितीच्छाविरहविशिष्टवन्ह्यादिलौकिकप्रत्यक्षादिसामग्र्यभावस्या
तिरिक्तकारणताकल्पने गौरवं । पक्षताहेतुत्वांगीकारे तु तादृशानुमितेरिच्छानियततया तत्रेच्छा पार्श्ववर्तिनी यस्मात् हेतुत्वे नैवोपपत्तिरिति लाघवेन सिषा
धयिषाद्युपपक्षताया हेतुत्वसिद्धिरित्याहुः मनु तथाप्यनुमितिसिध्यभावयोः केन रूपेण कार्यकारणभावः न च पर्वतोद्देश्यकवन्हिविधेयकानुमितित्वावच्छि का
न्नं प्रति पर्वतविशेष्यकवह्निप्रकारकनिर्णयत्वावच्छिन्नाभावत्वेन कारणत्वमेवमन्यत्रापि विषयभेदेन नहत्वमिति वाच्यं । तथासति द्रव्यं वह्निमत्पर्वतो द्रव्य
वानित्याकारकसाध्यनिर्णयदशायां पर्वतो वह्निमानित्यनुमितेरनुदयापत्तेः पर्वतो वह्निमानित्याकारकसाध्यनिर्णयदशायां पर्वतो वह्निमानित्यनुमि

पक्षता

७ तेरनुदयापत्तेश्चेति चेन्न पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति तथाविधानुमितिश्चेति चेन्न पर्वतत्वावच्छिन्नोद्देश्य
तानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति तथाविधानुमितिविषयकेच्छाविरहविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नि
त्वावच्छिन्नप्रकारताशालिनिर्णयत्वावच्छिन्नाभावत्वादिना कार्यकारणभावकल्पनेनोक्तापत्त्यभावात् ननु तथापि पर्वतो वह्निमानित्याकारकसाध्यनिर्णा
यकाले नीलपर्वतो वह्निमान् पर्वतः सुंदरवह्निमानित्याद्याकारिकाया अनुमितेरनुदयापत्तिः तादृशानुमितावप्यधिकं प्रविष्टं न तु तदंश इति न्यायेन पर्वतत
त्वावच्छिन्नविशेष्यकत्ववह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वोपगमान्नोक्तदोष इति वाच्यं तथा सत्यपि पर्वतो वह्निमानित्या
द्याकारकसाध्यनिर्णायकाले जातिमान् वह्निमान् वह्निमान्तो जातिमद्वानित्याद्याकारकजातित्वावलीढेन पर्वतत्ववह्नित्वादिविषयकानुमित्यनुदयापत्तेर्दुर्वार
त्वादिति अथ प्रतिबध्यतावच्छेदककोटावुद्देश्यत्वविधेयत्वांशे पर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकत्वं वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदक
तानिरूपकत्वं च क्रमेणाधिकं निवेश्यत इति नोक्तदोषः एतेनोद्देश्यताविधेयतयोः पर्वतत्वान्यधर्मानवच्छिन्नत्ववह्नित्वान्यधर्मानवच्छिन्नत्वयोर्वि
वेशनेन पर्वतो वह्निमानिति साध्यनिर्णयदशायामेकत्र हृदमिति रीत्या नीलत्वपर्वतत्वयोरुद्देश्यतावच्छेदकत्वावगाहिन्याः सुंदरत्ववह्नित्वयोर्विधेयताव राम॰
च्छेदकत्वावगाहिन्याश्च नीलपर्वतो वह्निमान् पर्वतः सुंदरवह्निमानित्याद्याकारिकाया अनुमितेरनुदयापत्तिवारणेऽपि पर्वतो वह्निमानित्याकारकसाध्यनिर्णयदशा ७

मीसामानाधिकरण्यसंबंधेननीलत्वविशिष्टपर्वतत्वेउद्देश्यतावच्छेदकत्वावगाहित्वात्संसर्गत्वविशिष्टवह्नित्वेविधेयतावच्छेदकत्वावगाहित्वाच्चनीलप
र्वतोवह्निमान्पर्वतः संसर्गवह्निमानित्याकारिकायाश्चानुमितेरनुदयापत्तिस्तत्रावच्छेदेवैशिष्ट्यनिरस्तंतादृशानुमितौपर्वतत्ववह्नित्वनिष्ठयोरुद्देश्यतावच्छेदकत्वविधेय
तावच्छेदकत्वयोर्निरवच्छिन्नत्वाभावेनप्रतिबध्यतावच्छेदकानाक्रांतत्वात्तत्त्वविनिगमनाविरहेणनीलत्वस्योद्देश्यतावच्छेदकतयासंसर्गत्वस्यविधेय
तावच्छेदकतयोद्देश्यत्वविधेयत्वयोः पर्वतत्वात्मधर्मानवच्छिन्नत्ववह्नित्वात्मधर्मानवच्छिन्नत्वयोर्निवेशेनैवप्रतिबध्यतावच्छेदकानाक्रांतत्वसंभवाद्
इतिचेन्न। तथापिपर्वतोवह्निमानित्याकारकसाध्यनिर्णयदशायांजातिमान्पर्वतोवह्निमान्पर्वतोजातिमद्वह्निमानित्याकारिकायाश्चानुमितेरनुदयापत्ति
तादवस्थ्यादितिचेन्नैवं। स्वनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नपर्वतत्वनिष्ठप्रतियोगिताकाभावविशिष्टोद्देश्यतानि
रूपितायाःस्वनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नवह्नित्वनिष्ठप्रतियोगिताकाभावविशिष्टायाविधेयतायास्तच्छाल्य
नुमितित्वावच्छिन्नंप्रतिपर्वतत्वनिष्ठावच्छेदकतानिरूपकविशेष्यतानिरूपितायावह्नित्वनिष्ठावच्छेदकतानिरूपकप्रकारतातच्छालिनिर्णयत्वावच्छि
न्नाभावत्वेनकारणत्वकल्पनेपिपूर्वदर्शितानुपपत्तेरनवकाशात्। एवंचनीलपर्वतोवह्निमान्पर्वतः संसर्गवह्निमाञ्जातिमान्वह्निमान्पर्वतोजातिमत्वानित्यनुमितौ
तास्वासिद्धौनाद्ययुगेवप्रतिबंधकत्वंकल्पनीयंपर्वमिनितथाविधसिद्धिकालेनतथाविधानुमितेरापत्तिरितिध्येयं। नचतथाप्येकसंबंधेनपर्वतोवह्निमानित्याका

८ रकसाध्यनिर्णयसत्वे संवेधांतरेणानुमित्यनुदयापत्तिस्तादृशस्थले मेवेति वाच्यं· तिस्तत्कोटिद्वयघटितविरूपितायां संयोगादिनिष्ठसांसर्गिकविषयतायां तन्निरूपितायां नि
रुक्तविधेयतायां तच्छालिस्यनुमितित्वावच्छिन्नं प्रतिनिरुक्तविशेष्यतानिरूपितायां संयोगादिनिष्ठसांसर्गिकविषयतायां तन्निरूपितायां निरुक्तप्रकारतायां च्छालिनिर्ण
यत्वावच्छिन्नाभावत्वेन कारणत्वकल्पनात्तत्र चैवं ह्रदे संयोगादिसंसर्गकसामानाधिकरण्यमात्रावगाहिपर्वतो वह्निमानित्याकारकसाध्यनिर्णयस्यस
त्वे पर्वतत्वव्यापकत्वादिविशिष्टसंयोगादिसंसर्गकानुमित्यात्मिकायाश्च वच्छिन्नकावच्छेदेनानुमितेरनुपपत्तिः विशिष्टस्यानतिरिक्ततया तस्या अपि संयोगा
दिसांसर्गिकविषयताशालित्वेन प्रतिबध्यतावच्छेदकाक्रांतत्वादिति वाच्यं· एवं च सांसर्गिकविषयतायां संयोगादिनिष्ठत्वं ष्ठत्वं निवेश्यं: तादृशसिद्धिप्रति
बध्यतायां संयोगादिनिष्ठसांसर्गिकविषयतायां संयोगत्वाद्यवच्छिन्नत्वस्य यथासत्वनिवेशेनावच्छेदकावच्छेदेनानुमितेः पर्वतत्वव्यापकत्वावच्छिन्नसंयोगादियम्सां
सर्गिकविषयताशालित्वेन संयोगादिनिष्ठसांसर्गिकविषयतायाः संयोगत्वाद्यवच्छिन्नापर्याप्ततया प्रतिबध्यतावच्छेदकानाक्रांतत्वात् प्रयोजनाभावात्ःपुनः
ह्रदे संयोगादिना साध्यनिर्णयदशायां संयुक्तसंयोगादिनामिततु मतन्ये संयोगादिसंसर्गकसिद्धिप्रतिबध्यतावच्छेदककोटौ किंचित्सांसर्गिकविषयत्वानिरूपित
संयोगादिवृत्तिसांसर्गिकविषयताकत्वं निवेशनीयं· संयोगादिवृत्तिसांसर्गिकविषयतायाः संयोगत्वादिसांसर्गिकविषयतानिरूपितत्वात् किंचिदितिं एवं च सा
मानाधिकरण्यमात्रावगाहिसिद्धिदशायामवच्छेदकावच्छेदेनानुमितेरप्युपपत्तेरिति· तत्र किंचित्वानिरुक्तेः संयुक्तसंयोगादिरूपपरंपरासंबंधसंसर्गकानुमितौ संयोग

निष्ठसांसर्गिकविषयतायां द्वैविध्येन प्रथमसंयोगादिनिष्ठसांसर्गिकविषयतायाः पर्वतोद्देश्यत्वनिरूपितत्वे द्वितीयसंयोगादिनिष्ठसांसर्गिकविषयता
यास्तु पर्वतोद्देश्यतानिरूपितत्वेपि तन्निरूपितत्वस्य वह्निविधेयतायामसत्वेनैव प्रतिबध्यतावच्छेदकानाक्रान्तत्वाच्च । एवमवच्छेदकावच्छेदेन
पर्वतो वह्निमानित्याकारकसाध्यनिर्णयाभावस्यापि निरुक्तसामानाधिकरण्यमात्रावगाह्यनुमितित्वावच्छिन्नं प्रति सत्वेन कारणत्वं कल्पनीयं । ते
न तादृशनिर्णयकाले न तादृशानुमित्यापत्तिः न च कारणतावच्छेदककोटौ संयोगनिष्ठसांसर्गिकविषयतायां पर्याप्तत्वमनिवेश्य सामानाधिकरण्य-
मात्रावगाहिनिर्णयाभावस्यावच्छेदकावच्छेदेन निर्णयाभावस्यैकरूपेणैव कारणत्वमास्तामिति वाच्यं । द्विविधनिर्णयसाधारणनिर्णयत्वनिर्वच
नानुपपत्त्या द्विविधाप्रामाण्यग्रहाभावविनिवेशानुरोधेन च पृथक्कारणत्वस्यैवौचित्यात् । एवमवच्छेदकावच्छेदेन संयोगादिसंसर्गकसाध्यनिर्ण
यकाले तादृशसंसर्गकानुमित्यापत्तिवारणाय निरुक्तोद्देश्यतानिरूपितनिरूपितेति पर्वतत्वव्यापकत्वावच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषयतानि
रूपितनिरुक्तविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति निरुक्तविशेष्यतानिरूपितपर्वतत्वव्यापकत्वावच्छिन्नसंयोगादिनिष्ठसांसर्गिकविषय
तानिरूपितनिरुक्तप्रकारताशालिनिर्णयत्वावच्छिन्नाभावत्वेन कार्यकारणभावान्तरं कल्पनीयं तेन नोक्तापत्तिः । न चोक्तरीत्यावच्छेदकावच्छेदे

पक्षता

८

साध्यनिर्णयाभावस्य सामानाधिकरण्यमात्रावगाह्यनुमितौ कारणत्वे कल्पनीये तत्रैव कार्यतावच्छेदककोटौ संयोगादिनिष्ठसांसर्गिकविषयताया एव
ना. त्वं व्यापकत्वावच्छिन्नत्वम्. निवेश्यावच्छेदकावच्छेदेनानुमितिसामानाधिकरण्यमात्रावगाह्यनुमित्युभयसाधारणरूपावच्छिन्नत्वमवच्छेदकावच्छे
देन साध्यनिर्णयाभावस्यैकविधमेव कारणत्वमिति वाच्यं. इच्छाया उत्तेजकत्वस्यावश्यमास्तयावच्छेदकावच्छेदेनानुमितिर्जायतां सामा
नाधिकरण्यमात्रावगाह्यनुमितिर्जायतामितीच्छाया उत्तेजकत्वानुरोधेन कार्यकारणभावद्वयस्यावश्यकत्वात्. अथ कार्यतावच्छेदककोटौ
विशेष्यत्वप्रकारत्वे विहायोद्देश्यताविधेयतयोर्निवेशे प्रयोजनविरहः न च पर्वतो वह्निमानित्याकारकसाध्यनिर्णयदशायां वह्निमान्पर्वतो वव
षानित्याकारकानुमितेरनुदयाय तथाविधेयतानिवेशनमावश्यकमिति वाच्यं: तथाप्युद्देश्यतानिवेशप्रयोजनाभावादिति चेन्न: पर्वते वह्निरि
त्याद्याकारकसाध्यविशेष्यकानुमितिसाधारण्यानुरोधेनोद्देश्यविधेयभावनिवेशस्यावश्यकत्वात्. किंचोक्तयुक्त्या विधेयतानिवेशस्यावश्यकत्वे
तस्याः स्वसमनियतोद्देश्यतां स्वरूपत एव निरूप्यत्वेनातिप्रसक्तविशेष्यतानिरूप्यत्वाभावेनोद्देश्यत्वविधेयत्वयोरेव निवेशनमावश्यकं. पर्वतो वह्निमा रा.म.०
निति साध्यनिर्णयसत्त्वे पर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याकारकेच्छाकाले पर्वतो वह्निमानित्याकारकानुमितेरुत्पादात्तत्र व्यभिचारवार ८

णायसाध्यनिर्णयाभावकारणतावच्छेदककोटौ साध्याध्यनिर्णयांशेनुमित्साभाववैशिष्ट्यं निवेश्यं । नचैवं पर्वतोवह्निमानित्याकारकसाध्यनिर्णय
काले पर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याद्याकारकेच्छासत्वेपि पर्वतोवह्निमानित्याकारकानुमित्यापत्तिः तादृशेच्छाया अप्यनुमितिवि
षयकत्वेन तदनुमित्साविरहविशिष्टतादृशसाध्यनिर्णयाभावरूपकारणासत्वादितिवाच्यं । पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितवह्निवि
धेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालित्वरूपानुगतरूपेणैव तादृशानुगतेच्छायास्तत्रोत्तेजकत्वाभ्युपगमेनोक्तानुपपत्तेरभावा
त् । अथ पर्वतोद्देश्यकत्वप्रकारवह्निविधेयकत्वप्रकारकानुगतगोचरेच्छाया उक्तानुगतरूपेणोत्तेजकत्वे पर्वतोवह्निमानितिशाब्दबोधसामग्रीसत्वे प
र्वतोवह्निमानितिशाब्दनिर्णयदशायां पर्वतोवह्निमानित्यनुमितेरितरसकलकारणसत्वे पर्वतोद्देश्यकवह्निविधेयकज्ञानं जायतामितीच्छायां सत्यां पर्व
तोवह्निमानित्याकारकानुमितेरापत्तिः तदानीं पर्वतोवह्निमानितिशाब्दबोधोदयेनैवेच्छाविषयसिद्ध्यानुमितेरनुदयेन तत्रानुमित्सुसत्ताविघ्नाप
त्त्यसंभवः नचनिरुक्तवह्निविधेयकत्वप्रकारतानिरूपितानुमितित्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालित्वरूपेणैव तादृशेच्छाया उ
त्तेजकतया नोक्तापत्तिरितिवाच्यं । तथासति तादृशशाब्दबोधसामग्रीसत्वापत्त्युक्तस्थले पर्वतोवह्निमानित्याकारकानुमितेरनुत्पादापत्तेरिति चेन्न । समा

नेषिषयेनुमितिसामग्र्यापेक्षयानुमितिमितिप्रकारकेच्छाविरहविशिष्टप्रत्यक्षसामग्र्याबलवत्त्वस्याभिहितत्वात्सिद्धं तथापर्वतोद्देश्यकवह्निविशेषधेयकानुमितित्वा
वच्छिन्नं प्रति तादृशानुमितित्वप्रकारकेच्छाविरहविशिष्टप्राप्यापर्वतो वह्निमानितिशाब्दबोधसामग्र्या अपि प्रतिबंधकसायाश्च वश्यमभ्युपेयतयोपदर्शि
तस्थले तादृशप्रतिबंधकसत्त्वादेव तादृशानुमित्युत्पत्तिनिर्वाहे साध्यनिर्णयप्रतिबंधकतावच्छेदककोटौ तादृशेच्छाप्रवेशानुगतरूपेणाभावनि
वेशे उपदर्शितापत्तेरभावात् ननु तथापि पर्वतो वह्निमानिति साध्यनिर्णयसत्त्वेऽनुमितिर्जायतामितीच्छादशायां पर्वतो वह्निमानित्याकारकानुमितेरनु
पपत्तिः तादृशेच्छायाः पर्वतत्वावच्छिन्नोद्देश्यकत्वादेरप्रकारत्वेन तथाविधप्रकारताशालीच्छाविरहविशिष्टसाध्यनिर्णयरूपप्रतिबंधकस्य तदानींस
त्त्वेन तादृशनिर्णयाभावरूपकारणाभावात् न चानुमितित्वावच्छिन्नप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वेन तस्या अपि त्वाने
वेशोत्तेजकत्वाभ्युपगमान्न दोष इति वाच्यं तथासति पर्वतो वह्निमानिति साध्यनिर्णयकाले घटपदानुमितिसामग्रीदशायां वह्निव्याप्यधूमवान्पर्वत इत्याका
रकपरामर्शादिरूपकारणाबलात् पर्वतो वह्निमानित्याकारकानुमितेरापत्तेर्दुर्वारत्वात् न चेष्टापत्तिः तदानीमुपदर्शितसाध्यनिर्णयस्याप्रति राम
बंधकीभूतघटानुमितेरुत्पत्ते तथाविधेच्छाविषयसिद्धिपर्वतो वह्निमानित्याकारानुमितेरनत्यादरितिचेन्न अनुमितिर्जायतामित्यननुगतेच्छानां तत्त १०

व्याप्तित्वेनैवोत्तेजकत्वाभ्युपगमेन घटाद्यनुमितिसामग्र्यसमवधानकालीनानामेवतादृशेच्छानां तत्तद्व्याप्तित्वेन स्वातंत्र्येणोत्तेजकतयोक्तप्रदर्शितानाप
त्यभावात्. तथाचोपदर्शितधर्मावच्छिन्नं प्रतितत्तद्व्याप्तित्वावच्छिन्नप्रतियोगिताकाभावकूटविशिष्टपर्वतत्वावच्छिन्नोद्देश्यकत्वपि निष्ठप्रकारतानि
रूपितवह्नित्वविधेयकत्वनिष्ठप्रकारताशाल्यनुमितिविषयकेच्छाविरहविशिष्टपर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकविशेष्यताभिन्निनिरू
पितसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्रकारताशालिनिर्णायत्वावच्छिन्नभावत्वेनवह्न
मानगिरिमाः प्रामाण्यज्ञानादौ तूत्तेजकीभूतस्य फलानुरोधेनान्यादृशा अपीच्छाया उत्तेजकत्वं चाभ्युपेत्य परिकल्पनीयमिति सिद्धं. केचित्तु स्व
वृत्तिप्रतियोगिकत्वसंबंधेन व्याप्तिविशिष्टो यः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताभिन्नविधेयताशाल्यनुमितिप्रागभा
वस्तद्भावविशिष्टानुमितित्वमात्रनिष्ठनिरवच्छिन्नप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वेनानुगतरूपेणैवोपदर्शितानानुमि
तीच्छानां तत्रोत्तेजकत्वमभ्युपगंतव्यं. स्ववृत्तित्वं च कालिकसंबंधेन बोध्यं। तथाच पर्वतो वह्निमानित्याकारककसाध्यनिर्णायकालीनघटाद्यनुमि
तिसामग्रीदशायामनुमितिर्जायतामितीच्छायाः स्ववृत्तिप्रतियोगित्वसंबंधेन व्याप्तिविशिष्टो यः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छि

नविधेयताताभिन्नपर्वतादिविधेयताशाल्यनुमितिप्रागभाववत्तद्घटनयात्तदानींतत्प्रागभावविशिष्टानुमितित्वमात्रनिष्ठनिरवच्छिन्नप्रकारतानिरूपितानुमिति
निष्ठविशेष्यताशालीच्छाभाववत्त्वेन तत्र हि शिष्टसाध्यनिर्णयरूपप्रतिबंधकसत्त्वेन तादृशनिर्णयाभावरूपकारणासत्त्वात्पर्वतो वह्निव्याप्यधूमवान्पर्वत इत्या
कारकपरामर्शादिघटकारणबलात्पर्वतो वह्निमानित्याकारकानुमित्यापत्तिः अथ तथापि पर्वतो वह्निमानित्याकारकसाध्यनिर्णयसत्त्वे वह्निविधेय
कानुमितिर्जायतामितीच्छादशायां पर्वतो वह्निमानित्याकारकानुमितेरनुपपत्तितादवस्थ्यं तादृशेच्छाया अनुमितित्वमात्रनिष्ठनिरवच्छिन्नप्रकार
तानिरूपितानुमितिनिष्ठविशेष्यताशालित्वाभावेनोपदर्शितरूपेणासंग्रहात् न च निरुक्तप्रागभावाभावविशिष्टानुमितित्वनिष्ठप्रकारतानिरूपितानुमि
तिनिष्ठविशेष्यताशालीच्छात्वेनैवानुमितिर्जायतामितीच्छाया उत्तेजकत्वाभ्युपगमेन वह्निविधेयकानुमितिर्जायतामितीच्छाया अपि संग्रहान्नोक्तानु
पपत्तिरिति वाच्यं पर्वतो वह्निमानित्याकारकसाध्यनिर्णयकाले एकत्र द्वयमिति रीत्या घटादिविधेयकानुमितित्वप्रकारिकायाः सामानाधिकरण्यसंबंधे
न घटादिविधेयकत्वविशिष्टानुमितित्वप्रकारिकाया घटविधेयकानुमितिर्जायतामित्याकारिकेच्छायाः सत्त्वे घटाद्यनुमितिसामग्र्या असमवधानदशायां पर्व
तो वह्निमानित्याकारकानुमित्यापत्तिवारणाय मात्रपदार्थप्रकारतायां निरवच्छिन्नत्वं निवेश्योक्तरूपेणेच्छाया उत्तेजकत्वस्यावश्यकत्वात् न च वह्निविधे
यकानुमितित्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वेन वह्निविधेयकानुमितिर्जायतामितीच्छाया अपि तां प्रत्युत्तेजकत्वाभ्युपगमान्ना

नुपपत्तिरिति वाच्यं । तथा सति पर्वतो वह्निमानित्याकारकसाध्यनिर्णायकाले भूतलं वह्निमदित्याकारकानुमितिसामग्रीसत्त्वे वह्निसत्त्वे वह्निविधेयका-
नुमितिर्जायतामित्याकारकेच्छादशायां पर्वतो वह्निमानित्याकारकानुमित्यापत्तेर्वज्रलेपत्वात् । न चेष्टापत्तिः । तदानीं तादृशसाध्यनिर्णयाप्र-
तिबन्धीभूतभूतलं वह्निमदित्याकारानुमितेरुत्पत्त्यैवेच्छाविषयसिद्ध्या पर्वतो वह्निमानित्याकारकानुमितेरनुदयेन तादृशानुमित्यापत्ताविष्टापत्ते-
रसंभवादिति चेन्न । वह्निविधेयकानुमितिर्जायतामित्याकारकेच्छाया अपि स्ववृत्तिप्रतियोगिकत्वसंबन्धेन ज्ञानविशिष्टो यः पर्वतत्वावच्छि-
न्नोद्देश्यताभिन्नवह्नित्वावच्छिन्नविधेयतानिरूपितोद्देश्यताशाल्यनुमितिप्रागभावाभावविशिष्टं किंचिदुद्देश्यकत्वनिष्ठप्रकारतानिरूपितवह्निवि-
धेयकत्वनिष्ठप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वरूपेणोत्तेजकत्वाभ्युपगमेन सकलानुपपत्तिविरहात् । न च तथा सत्यपि पर्वतो वह्नि-
मानित्याकारकसाध्यनिर्णायकाले पर्वतोद्देश्यकवह्निविधेयकज्ञानं जायतामित्याकारकेच्छासत्त्वे पर्वतो वह्निमानित्याकारकानुमितेरनुपपत्तिरस्त्येवेति वाच्यं ।
तादृशेच्छाया अपि यत्पर्वतत्वावच्छिन्नोद्देश्यकत्वनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकत्वनिष्ठप्रकारतानिरूपितानुमितिनिष्ठविशे-
ष्यताशालीच्छात्वेन तत्रत्यानुमितेरुत्तेजकत्वाभ्युपगमात् । एवं चायं दर्शितानामननुगतेच्छानां निरुक्तप्रागभावाभावविशिष्टतादृशेच्छात्वेनानुगतानां

पक्षता

१२ चोपदर्शितानुगतरूपेणात्मनो जनकत्वमिति सर्वासामेवेच्छानामनुगतरूपेणोत्तेजकत्वाभ्युपगमेन्नैव सर्वसामंजस्ये तत्रानुगतोपदर्शितेच्छानां तन्मद्ध्ये किंचि
नोत्तेजकताभ्युपगमप्रयुक्तस्ते चोक्तगौरवसंपादकत्वेनाहुः तदसत् तथासत्यपि पर्वतो वह्निमानित्याकारसाध्यनिर्णये काले काप्यपर्वतो घटवानित्याकारकसा
ध्यनिर्णायकालेच घटाद्यनुमितिसामग्रीदशायां वह्न्यनुमितिसामग्रीदशायामनुमितिर्जायतामित्याकारकेच्छासत्वे तत्र विनिगमनाविरहेण पर्वते वह्निघटाद्यु
भयविधेयकानुमितेरुत्पत्त्या भवन्मते तदनुपपत्तेः तदानीं पर्वतो हेतुप्रकवह्निविधेयकानुमितिप्रतिबंधकीभूतोपदर्शितप्रागभावाभावविशिष्टेच्छाविरह
विशिष्टपर्वतो वह्निमानित्याकारकसाध्यनिर्णयसत्वेन तुल्ययुक्त्या हेतुप्रघटाद्यनुमितिप्रतिबंधकतापर्वतत्वावच्छिन्नोद्देश्यतानिरूपितघटादिनिष्ठविधे
यतातद्भिन्नविधेयताशाल्यनुमितिप्रागभावाभावविशिष्टतयाविधेच्छाभावविशिष्टपर्वतो घटवानित्याकारकसाध्यनिर्णयसत्वेन च तादृशनिर्णयाभा
वरूपकारणासत्वात् ननु पर्वतो हेतुप्रकवह्निविधेयकानुमितिप्रतिस्वहेतुप्रतियोगीकालसंबंधेन कृतिविशिष्टोयः पर्वतत्वावच्छिन्नोद्देश्यतानिरू
पितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितिप्रागभावस्तदभावविशिष्टानुमितित्वप्रकारकेच्छात्वेनैवानुमितिर्जायतामितीच्छायास्तत्रोत्तेजकत्वमभ्युपग राम॰
म्यपर्वतो वह्निमानित्याकारकसाध्यनिर्णयस्य प्रतिबंधकत्वमभ्युपेयते एवं घटाद्यनुमितिं प्रत्यपि तत्यापि स्वसंबंधेन कृतिविशिष्टोयः पर्वतत्वावच्छिन्नोद्देश्यतानिरू २२

पिवरादिनिष्ठविधेयतात्वच्छिन्नानुमितिप्रागभावस्य तद्भावविशिष्टानुमितित्वप्रकारकेच्छात्वेन तादृशेच्छां प्रति जनकीभूतस्य पर्वतो वह्निमानित्याकारकसा
ध्यनिर्णयस्य प्रतिबंधकत्वमभ्युपेयत्वे: तथा चोपदर्शितनियतस्थले विनिगमकविरहेणावश्यकतया वह्निघटोभयविधेयकानुमितेरुत्पत्त्या तथापि विधे
च्छाविरहविशिष्टतादृशसाध्यनिर्णयाभावरूपकारणासत्त्वेन नानुपपत्तिलेशोऽपीति चेन्न: तथा सत्युपदर्शितस्थले तथाविधविशिष्टेतरभावविशिष्टसा
ध्यनिर्णयाभावरूपकारणसंपत्त्या पर्वतो वह्निमानित्यनुमितेरुत्पत्तिः पर्वतो वह्निमानित्यनुमितेरुत्पत्तौ च तादृशविशिष्टेच्छाविरहविशिष्टसाध्यवि
र्णयाभावरूपकारणासत्त्वात् संतान्योन्याश्रयस्य दुर्वारत्वात्· किं चोक्तस्थले पर्वतो वह्निर्वह्नितो वह्नितो वह्निमानित्यनुमित्यनुत्पादस्य तादृशानुमित्यु
त्पादाधीनत्वेऽप्यात्माश्रयोऽपि दुर्वारः साक्षात्परंपराधीनकारणापेक्षायाश्चात्माश्रयघटकत्वात्· न चोक्तकाचन्योन्याश्रयादिकं न दोषाय· कार्यकारणभाव
ज्ञानाविघटकत्वादिति वाच्यं उक्तान्योन्याश्रयादेर्दोषत्वे विधिवादे प्रवृत्तिं प्रति कृतिसाध्यताज्ञानस्य हेतुत्वाभावेन तथाकार्ये कृतिसाध्यताज्ञा
नं न च पक्षेणाक्रमनंतरं पाके सति कृतिसाध्यताज्ञानं तस्मिन् सति कृतिरित्यन्योन्याश्रयात् न्यायाशंकायाश्चिंतामणिकृतायामसंगत्यापत्तेः कार्यकारणभा
वज्ञानविघटकतया तन्मात्रविवक्षार्थकारणभावं विघटकयोस्तयोरन्योन्याश्रयादेर्दोषतायामयुक्तितोऽल्पेनानुगतेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वं स्वी

पक्षता

१३ कृत्यानुमितिं प्रति साध्यनिर्णयाभावस्य कारणत्वमवश्यमंगीकार्यमिति न किंचिदेतत्ः वस्तुतस्तु• अनुमितिर्जायतामित्याकारकानुगतेच्छानामप्युप
स्थितौ सत्यामनुमितित्वमात्रनिष्ठनिरवच्छिन्नप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वादिनानुगतरूपेणैव लाघवादुत्तेजकत्वं स्वीक्रियते• ब
लवदनुमितिसामग्रीसमवधानकालीनतादृशेच्छायाश्चोत्तेजकत्वेन प्रतिबंधकत्वं कल्प्यते तेन तादृशानुमितिसामग्रीसमवधानकालीनतादृशेच्छादशायां
पर्वतो वह्निमानित्याकारकसाध्यनिर्णयकाले वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शबलात्पर्वतो वह्निमानित्याकारकानुमितेरापत्तिः• न चैवं लाघवान
वकाश इति वाच्यं• तादृशेच्छानां तत्तदुत्तेजकत्वेन तावदिच्छाव्यक्त्यभावकूटस्यैकत्र निवेशेन तेषां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेणा
नंतकार्यकारणभावकल्पनापत्तिरिति तदपेक्षया तत्तदुत्तेजकत्वेन प्रतिबंधकत्वकल्पनस्यैव समुचितत्वात्• पर्वतो हृदपक्षकवह्निविधेयकसंयोगादिसंसर्ग
कानुमितिभिन्नानुमितिसामग्रीसमवधानकालीनत्वविशिष्टेच्छानुगतरूपेणैव प्रतिबंधकत्वकल्पनसंभवाच्च• न च तादृशसामग्रीसमवधानकालीन
त्वं दुर्वचमिति वाच्यं• स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसंबंधेन तादृशसामग्रीविशिष्टत्वस्यैव तादृशसामग्रीसमवधानकालीनत्वरूपत्वात्तस्य
दुर्वचत्वाभावात् अन्यथैवमपि सर्वासामेवेच्छानां तत्तदुत्तेजकत्वेन निवेशो दुर्वारः• तथा हि यत्र वह्निव्याप्यधूमवान्पर्वतः पर्वतो वह्निमान्वह्निव्याप्यधूमव्याप्यवांश्चे रामः
ति समूहालंबनात्मकपरामर्शानंतरं पर्वतो हृदपक्षकवह्निविधेयकानुमितिर्जायतां पर्वतो हृदपक्षकवह्निव्याप्यधूमविधेयकानुमितिश्च जायतामित्याकारकस्म १३

हालंबनात्मेकानुमितीच्छानुमितिजायितामित्याकारिकावानुमितीच्छाजनानंतरं तत्रैवं नं च पर्वतो वह्निमान्वह्निव्याप्यधूमवांश्चेति समूहालंबनात्मकपराम
र्शात्मकानुमितिर्जाता तत्रैकवारं वह्न्यनुमित्यनंतरं तादृशेच्छाबलात्पुर्वनेन्द्व्यनुमित्यापत्तिवारणायानुमितीच्छायां स्वविषयवसिद्ध्यनुपहितत्वविशेषणमावश्य
कं ॰ तच्च स्वघटितमूर्त्तिकत्वेन तु न व्यक्तिविश्रांतमित्यवश्यं वाच्यं ॰ तथा च पर्वतो धूमव्यापकवह्निविधेयकानुमितिर्जायतामित्याकारकानुगतेच्छानामपि तत्तन्न व्यक्ति
त्वेन निवेशस्यावश्यकत्वेनुमितिर्जायतामित्याकारकाननुगतेच्छानामपि तत्तद्व्यक्तित्वेन निवेशस्यावश्यकतया सर्वसिद्धिवेच्छानां तत्तद्व्यक्तित्वेन नि
वेशो दुरुद्धर एवेति चेन्न ॰ उपदर्शितेच्छावारणाय स्वप्रतियोगिकप्रागभावाभावाधिकरणत्व स्वविषयकत्व समानाधिकरण्य एतत्त्रितयसंबंधावच्छिन्न
स्यानुमितित्वावच्छिन्नप्रतियोगिताकाभावस्यैवानुमितीच्छायां विशेषणताभ्युपगमेन संबंधमध्ये स्वत्वस्यानिवेशकत्वेपि च प्रविष्टतयावश्यकगत्या नि
वेशे न तत्तद्व्यक्तिविश्रांतत्वाभावात् उपदर्शितेच्छेच्चैकवारं वह्न्यनुमितौ जातायामनुमितीच्छायामुपदर्शितत्रितयसंबंधेनानुमितेरेव सत्वेन निरुक्तत द
भावस्यासत्त्वान्न तादृशविशिष्टानुमितीच्छाविरहविशिष्टसाध्यनिर्णयाभावरूपकारणसमवधानमिति न पुनर्वह्न्यनुमित्यापत्तिः ॰ न च तथापि पर्वतो
हेऽपवह्निविधेयकानुमितिर्जायतामहानमोहे ध्यापकवह्निविधेयकानुमितिर्जायतामित्याकारकसमूहालंबनेच्छारूढायां साध्यनिर्णयसत्वे पर्वतो

२४ वह्निमानित्याकारकानुमितेरुत्पत्त्यनंतरं महानसं वह्निमदित्याकारानुमितेरनुत्पत्तिः तादृशानुमितीच्छाया उक्तत्रितयसंबंधेनानुमितिविशिष्टत्वेनानुमित्यभा
वविशिष्टानुमितीच्छाविशिष्टसाध्यनिर्णयाभावरूपकारणासत्वादिति वाच्यं पर्वतो ह्रदपकवह्निविधेयकानुमितिं प्रति तादृशत्रितयसंबंधावच्छिन्नप्रति
योगिताकपर्वतो ह्रदपकवह्निविधेयकानुमित्यभावविशिष्टानुमितीच्छाविरहविशिष्टपर्वतविशेष्यकवह्निप्रकारकनिर्णयत्वावच्छिन्नाभाववत्वेन मता
न सो ह्रदपकवह्निविधेयकानुमितिं प्रति तादृशत्रितयसंबंधावच्छिन्नप्रतियोगिताकमता न सो ह्रदपकवह्निविधेयकानुमित्यभावविशिष्टानुमितीच्छावि
रहविशिष्टमहानसविशेष्यकवह्निप्रकारकनिर्णयत्वावच्छिन्नाभाववत्वेनेत्यादिरीत्या कार्यकारणभावकल्पनेनादोषात् न च प्रागभावस्य प्रामाणि
कतया कथं न घटितसंबंधघटितत्रितयसंबंधावच्छिन्नप्रतियोगिताकानुमित्यभाववत्त्वस्यानुमितीच्छायां विशेषणत्वसंभव इति वाच्यं महीयानुमितिपरा
मर्शकार्यकारणभावविचारे प्रागभावस्य प्रामाणिकत्वव्यवस्थापनात् स्वविषयकत्वस्वसामानाधिकरण्यकालिकविशेषणतेति त्रितयसंबंधावच्छि
न्नप्रतियोगिताकानुमित्यभावस्यैवानुमितीच्छायां विशेषणत्वसंभवाच्च ननु तथापि सर्वासामेवानुमितीच्छानामनुगतेन रूपेणानिवेशे यत्र पर्वतो
वह्निमानित्याकारकसाध्यनिर्णयकाले क्रमेण पर्वतो ह्रदपकवह्निविधेयकानुमितिद्वयं जायतामित्याकारिकानुमितीच्छा जाता तत्र तादृशानुमिती राम०
च्छायाः पर्वतो ह्रदपकवह्निविधेयकानुमितिद्वयं जायतामित्याकारिकानुमितीच्छा जाता तत्र तादृशानुमितीच्छायाः पर्वतो ह्रदपकवह्निविधेयकानुमितिर्जायता २४

मित्याकारकानुमितीच्छासाधारणानुगतरूपेणैव निवेशे न पर्वतो वह्निमानित्याकारकैकानुमितेरुत्पत्त्यनंतरं तादृशायरनुमिमितेरनुत्पत्तिप्रसंगः
तादृशानुमितीच्छायाउक्तत्रितयसंबंधेन तादृशानुमितिविशिष्टत्वतया तादृशानुमित्यभावविशिष्टानुमितीच्छाविरहविशिष्टसाध्यनिर्णयाभावरू
पकारणाभावात्· न च तादृशानुमितीच्छायास्तद्व्यक्तित्वेन निवेशेपि कथं निस्तारः तादृशानुमितीच्छायास्त्रितयसंबंधेनानुमितिविशिष्टत्वान
पायादिति वाच्यं। तादृशानुमितीच्छायास्तद्व्यक्तित्वेनोत्तेजकत्वेन तस्यामुक्तत्रि॰ तयसंबंधावच्छिन्नप्रतियोगिताकानुमित्यभाववैशिष्ट्यनिवेशे प्रयो
जनाभावात् न च तद्रूपनिवेशे तादृशानुमितीच्छाबलादनुमितिद्वयोत्पत्त्यनंतरं पुनरनुमित्यापत्तिरिति वाच्यं तावत्पर्यंतं तादृशेच्छाया असत्त्वेन तद्व्यक्तित्वेन पुन
रनुमित्यापत्तेरसंभवादिति चेन्न· तादृशानुमितीच्छाया अगत्या तद्व्यक्तित्वेनैव निवेशः तदितरिक्तानुमितीच्छानामेवानुगतरूपेणानिवेश इत्यभ्युपगमा
त्· वस्तुतस्तु· क्रमेण पर्वतोहृदैकवह्निविधेयकानुमितिद्वयं जायतामित्याकारानुमितीच्छाया अपि पर्वतोहृदैकवह्निविधेयकानुमितिर्जायतामि
त्याकारकानुगतानुमितीच्छासाधारणानुगतरूपेणैव निवेशः न चोक्तदोषः स्ववृत्तिवह्न्यनुमितिभिन्नावृत्तिव्यासज्यवृत्तिधर्मावच्छिन्नविषयत्वाभा
वविशिष्टायास्तन्निरूपितविषयतातद्वत्त्वसमानकालीनत्वसामानाधिकरण्यैतत्त्रितयसंबंधावच्छिन्नप्रतियोगिताकानुमित्यभावस्यानुमितौ

च्छायांनिविशेनतादृशानुमितिद्वयंजायतामितीच्छायास्तादृशाया मुख्यवृत्तिधर्मावच्छिन्नविषयतावत्त्वयानतदभाववविशिष्टविषयतावत्त्वसंबंधेनतन्न्यनु
मितेः सत्वमित्यदोषात्यत्र वह्निविधेयकानुमितिमात्रवृत्तिव्यासज्यवृत्तिधर्मावच्छिन्नविषयताशालिनीक्रमेणापर्वतोह्रदोभयकवह्निविधेयकानुमितिद्वयं
जायतामित्याकारिकानुमितीच्छा तत्र च न पर्वतोवह्निमानित्याकारिकानुमितेरुत्पत्त्यनंतरं पुनस्तादृशापरानुमितेरुत्पत्तिः तादृशानुमितिद्वयोरन्यतराव
पितादृशानुमितीच्छायाविषयसिद्धेरभावादिति तत्र तादृशापरानुमितेरुत्पत्तिवारणाय सहवृत्तिवह्न्यनुमितिभिन्नान्यवृत्तित्वं व्यासज्यवृत्तिधर्मेनि
वेशितं - नचव्यासज्यवृत्तित्वमननुगतं दुर्वचमितिवाच्यं · प्रत्येकमात्रवृत्तिधर्मावच्छिन्नापर्याप्तत्वस्यैवव्यासज्यवृत्तित्वरूपत्वात् प्रत्येकमात्रवृत्तित्वं च
स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेनभेदविशिष्टान्यत्वमितिदिक् · ननुतथापिवह्निव्याप्यधूमवान्पर्वतइत्याकारकपरामर्शकाले
पर्वतोवह्निमानित्याकारकसाध्यनिर्णयकाले आलोकलिंगकपर्वतोह्रदोभयकवह्निविधेयकानुमितिर्जायतामित्याकारकेच्छादशायांपर्वतोवह्निमा
नित्याकारकानुमितेरापत्तिः तदानीं पर्वतोह्रदोभयकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छासत्वे
नतद्विरहविशिष्टसाध्यनिर्णयाभावरूपकारणासत्वात् · नचेष्टापत्तिः तदानीं तादृशानुमित्युत्पत्तावपि तादृशेच्छायाविषयसिद्ध्यसंभवात् · नचकिंचिल्लिं
गकत्वाप्रकारकत्वस्योत्तेजकीभूतानुमितीच्छायांविशेषणत्वोपगमान्नोक्तापत्तिरितिवाच्यंतथासतिधूमलिंगकपर्वतोह्रदोभयकवह्निविधेयकानुमितिर्जा

यतामिसाकारकेच्छासत्वेपिसाध्यनिर्णायकालेवह्निव्याप्यधूमवान्पर्वतइत्याकारकपरामर्शोत्पर्वतोवह्निमानित्याकारकानुमितेरनुत्पत्तिरितिचेन्न·
धूमलिंगकपर्वतोद्देश्यकसंयोगसंसर्गकवह्निविह्निविधेयकानुमिति त्वावच्छिन्नंप्रतिधूमलिंगकत्वप्रकारतानिरूपितपर्वततावच्छिन्नोद्देश्य
तानिरूपितवह्निविधेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छाद्यभावविशिष्टपर्वततावच्छिन्नविशेष्यकसंयोगसंसर्गक
वह्नित्वावच्छिन्नप्रकारकनिर्णयत्वावच्छिन्नाभावत्वेनहेतुत्वमितिरीत्यालिंगभेदेनकार्यकारणभावभेदाभ्युपगमेनोक्तदोषाभावात्·नचत
थापिधूमलिंगकत्वेतेनघटादिप्रकारकधूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामितीच्छासत्वेधूमलिंगकत्वेनघटादिप्र
कारकधूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामितीच्छासत्वेधूमलिंगकपरामर्शसत्वेसाध्यनिर्णायसत्वेपर्वतोवह्निमानित्याका
रकानुमितेरनुत्पत्तिः तादृशेच्छायांधूमलिंगकत्वस्यप्रकारतयोत्तर्षितेच्छाविरहविशिष्टसाध्यनिर्णयत्वप्रतिबंधकत्वादितिवाच्यं·धूम
लिंगकत्वत्वावच्छिन्नप्रकारतानिरूपितत्वस्यैवनिवेशाभ्युपगमात्·अथनथापिविशिष्टेवैशिष्ट्यमितिरीत्याएकत्रद्वयमितिरीत्यावाविषयता
शालिन्यान्यालोकलिंगकत्वेसतिधूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याकारकेच्छायाःसत्वेधूममात्रलिंगकपराम
र्शकालेसाध्यनिर्णायकालेपर्वतोवह्निमानित्याकारकानुमितेरापत्तिः तदानीमुपदर्शितेच्छाविरहविशिष्टसाध्यनिर्णयाभावसत्वात् तादृशेच्छा

विषयसिद्धेरभावेन तदानीमिष्टापत्तेरसंभवादिति चेन्न धूमान्यलिंगकत्वतावच्छिन्नप्रकारत्वानिरूपितत्वमेव धूमलिंगकत्वतावच्छिन्नप्रकारतानिरू
पितत्वपदार्थस्तथा निवेशेन उपदर्शितेच्छाया असंग्रहे गौरवाभावात् । नचैवं सति धूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिरालोकलिंगकपर्वतो
द्देश्यकवह्निविधेयकानुमितिश्च जायतामित्याकारकसमूहालंबनेच्छाया असंग्रहप्रसंगः तादृशेच्छीयानुमितिनिष्ठविशेष्यताया धूमान्यालोकलिंगकत्व
त्वावच्छिन्नप्रकारतानिरूपितत्वादिति वाच्यं । समूहालंबने प्रकारताभेदेन विशेष्यताया भेदात् तादृशसमूहालंबनेच्छायामनुमितिनिष्ठविशेष्यताद्वयां
गीकारेण धूमलिंगकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताया आलोकलिंगकत्वप्रकारत्वानिरूपितत्वया असंग्रहाभावात् । नचैवं विशिष्टे वैशिष्ट्य
मित्यादिरीत्या विषयताशालिन्युपदर्शितेच्छाया अपि संग्रहप्रसंग इति वाच्यं तत्रोपदर्शितसमूहालंबनेच्छायेस्यायावे लक्षणापानुपपत्याभयप्रकारतानिरू
पितैकविशेष्यताया अनुपगमेन संग्रहाभावात् । अथ तल्लिंगकत्वस्य तद्विषयकपरामर्शजन्यत्वरूपतया धूमान्यविषयकपरामर्शजन्यतात्वावच्छि
न्नप्रकारत्वानिरूपितत्वमेव धूमान्यलिंगकत्वतावच्छिन्नप्रकारत्वानिरूपितत्वं वाच्यं - तथा च साध्यनिर्णयकाले आलोकलिंगकपरामर्शेनानु
नुमितिर्जायतामित्याकारकेच्छासत्त्वे धूममात्रलिंगकपरामर्शदशायां धूमलिंगकानुमितेरुदयप्रसंगः तत्र धूमान्यत्वादिघटितधूमान्यविषयकपरा
मर्शजन्यतात्वस्यानुमितिनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकत्वेन तदवच्छिन्नप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छाया विद्यमान

तयातद्भावविशिष्टसाध्यनिरूपिताभावरूपकारणासत्वादितिचेन्न· वह्निगताधूमत्वविरुद्धोयोधर्मस्तदवच्छिन्नप्रकारतानिरूपितविषयित्वप्रकारतानिरू
पितपरामर्शप्रकारतानिरूपितजन्यतात्वावच्छिन्नप्रकारताया एव धूमान्यविषयकपरामर्शजन्यतात्वावच्छिन्नप्रकारतापर्याप्तत्वाभ्युपगमेनादोषात्·
नच वह्निगताधूमत्वान्योयोधर्मस्तत्वेनोच्यतामितिवाच्यं तथासति धूमविषयकपरामर्शजन्यानुमितिर्जायतामित्याकारकेच्छाया अप्रसंग्रहप्रसंगात्· नचैवं सत्यपि
धूमपरामर्शकाले साध्यानिर्णयदशायां द्रव्यत्वावच्छिन्नविषयकपरामर्शजन्यानुमितिर्जायतामितीच्छासत्वे धूमपरामर्शाद्धूमलिंगकानुमित्युत्पत्तिर्दुरु
द्धरैवेतिवाच्यं· वह्निगताधूमत्वान्योयोधर्मस्तन्निष्ठप्रकारतानिरूपितावच्छिन्नत्वप्रकारतानिरूपितविषयित्वप्रकारतानिरूपितजन्यतात्वावच्छि
न्नप्रकारत्वानिरूपितत्वस्यापि सत्वात्तत्रेच्छानुमितिनिष्ठविशेष्यतायां विशेषणत्वाभ्युपगमेनोक्तापत्तेरभावात्· तथाच धूमत्वावच्छिन्नप्रकारताशालिप
रामर्शजन्यपर्यवसितत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नंप्रतिधू
मत्वविरुद्धधर्मावच्छिन्नप्रकारतानिरूपितविषयित्वत्वावच्छिन्नप्रकारतानिरूपितपरामर्शत्वावच्छिन्नप्रकारतानिरूपितजन्यतात्वावच्छिन्नप्रकारता
निरूपितवह्निगताधूमत्वान्योयोधर्मस्तन्निष्ठप्रकारतानिरूपितपरामर्शत्वावच्छिन्नप्रकारतानिरूपितजन्यतात्वावच्छिन्नप्रकारत्वानिरूपितवह्निगता
धूमत्वान्योयोधर्मस्तन्निष्ठप्रकारतानिरूपितजन्यतात्वावच्छिन्नप्रकारतानिरूपिताचयापर्यवसितत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितसंयोगादिनिष्ठसां

पक्षता

१७ सर्गिकविषयकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यतातच्छालीच्छाभावविशिष्टपर्वतत्वावच्छिन्न
विशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिर्णयत्वावच्छिन्नाभाववत्वादिनानुमितिपक्षतयोर्लिंगभे
देनकार्यकारणभावः पर्यवसितः नचैवं सति लिंगभेदेन पक्षताभेदेनु कार्यकारणभावभेदे गौरवमिति वाच्यं अननुगतानां तादृशा[illegible]वस्य प्रामाणिकत्वेनादो
षात् एतदभिप्रायेणैव दीधितिकारेण व्याप्यपक्षताग्रंथे लिंगविशेषेणापि नियंत्रितं पक्षत्वमिति ध्येयं केचित्तु तत्तल्लिंगकानुमितीच्छानामन्यलिंगके
च्छासाधारणपर्वतोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वेनैवोत्तेजकत्वं न तु यद्दर्शितरी
त्यान्यलिंगकेच्छाव्यावृत्ततत्तल्लिंगककानुमितीच्छात्वेनैवेति पक्षतानुमित्योर्न लिंगभेदेन कार्यकारणभावभेदः नचैवं सति वह्निव्याप्यधूमवान्पर्वत इत्या
कारकधूममात्रलिंगकपरामर्शकाले साध्यनिर्णयदशायां धूमान्यमात्रलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितीच्छाकाले धूमलिंगकपर्वतोद्देश्यकवह्नि
विधेयकानुमित्यापत्तिः कथं परिहरणीयेति वाच्यं धूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमित्यापत्तिः कथं परिहरणीयेति वाच्यं धूमलिंगकपर्व
तोद्देश्यकवह्निविधेयकानुमित्यापत्तेः धूमान्यमात्रलिंगकानुमित्यापत्तिः कथं परिहरणीयेति वाच्यं धूमलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमित्यापत्ते राम०
धूमान्यमात्रलिंगकानुमितीच्छात्वादिना स्वातंत्र्येणान्यलिंगकेच्छायाः कामिनीजिज्ञासादिवत्प्रतिबंधकत्वाभ्युपगमेनैवोक्तापत्तेः परिहारसंभवात् अत्र धूम १७

न्यमात्रलिंगकतथाविधानुमितिच्छात्वं धूमान्यलिंगकत्वप्रकारतानिरूपितपर्वतोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारतानिरूपितानुमि
तिनिष्ठविशेष्यताशालीच्छाभिन्नधूमान्यलिंगकत्वप्रकारतानिरूपिततादृशानुमितिनिष्ठविशेष्यताशालीच्छात्वं · अतो न धूमलिंगकतादृशानु
मितिर्जायतामालोकलिंगकानुमितिश्च जायतामित्याकारकसमूहालंबनेच्छायाः प्रतिबंधकत्वापत्तिः न चा एकत्र द्वयमितिरीत्याविषयतांशे लिमाः
धूमलिंगकत्वेऽस्त्वालोकलिंगकतादृशानुमितिर्जायतामित्याकारिकेच्छायाः प्रतिबंधकत्वानुपपत्तिः समूहालंबनेच्छायां विशेष्यताद्वयं तीका
रेणाधूमान्यलिंगकत्वप्रकारतानिरूपितायाधूमलिंगकत्वप्रकारतानिरूपिततादृशानुमितिनिष्ठविशेष्यतायाः सत्वेन तथाविधविशेष्यताशा
लीच्छाभिन्नत्वाभावात् · एकत्रद्वयमितिरीत्याविशेष्यताशालीच्छायां तत्प्रकारतानिरूपितैकविशेष्यताऽभ्युपगमे न धूमलिंगकत्वप्रकार
तानिरूपिततादृशानुमितिनिष्ठविशेष्यतायां धूमान्यलिंगकत्वप्रकारतानिरूपितत्वेन धूमान्यलिंगकत्वप्रकारतानिरूपिततादृशानुमिति
निष्ठविशेष्यतायायाः अभावेन तथाविधविशेष्यताशालीच्छाभिन्नत्वसत्वात् एतेन धूमान्यमात्रलिंगकानुमितीच्छात्वं धूमलिंगकत्वप्रका
रतानिरूपिततादृशानुमितिनिष्ठविशेष्यताशालीच्छाभिन्नधूमान्यलिंगकत्वप्रकारतानिरूपिततादृशानुमितिनिष्ठविशेष्यताशालीच्छात्वमि
तिनिरस्तं · तथासत्येकत्रद्वयमितिरीत्याविषयताशालिन्याधूमलिंगकत्वेसति आलोकलिंगकतादृशानुमितिर्जायतामित्याकारिकेच्छायाः प्रतिबं

धकत्वानुपपत्तिः न ह्येवं यत्र क्रमेण धूमलिंगकेच्छा तदनंतरं चालोकलिंगकेच्छा तत्राप्यनुमितेरनुत्पत्तिः तथाविधविशेष्यताशालीच्छाभिन्नायाश्चा
लोकलिंगकेच्छायाः प्रतिबंधिकायाः सत्वादिति वाच्यं॰ योग्यात्मविशेषगुणानां युगपदुत्पत्त्यनंगीकारेणोक्तेच्छाद्वयपरामर्शानां त्रयाणां युग
पदवस्थानासंभवेनोक्तापत्तेरसंभवात् न च योग्यात्मविशेषगुणानां युगपदुत्पत्त्यनंगीकर्तृनवीनमते त्रयाणां युगपदवस्थानसंभवेनोक्तापत्तिर्दु
र्वारैवेति वाच्यं। तथापि धूमलिंगकतादृशानुमित्यादौ धूमस्यालिंगकत्वप्रकारत्वानिरूपिततादृशानुमितिनिष्ठविशेष्यताशालीच्छाविशिष्टधूमान्यलिंग
कत्वप्रकारतानिरूपिततादृशानुमितिनिष्ठविशेष्यताशालीच्छात्वादिना प्रतिबंधकत्वाभ्युपगमेनोक्तापत्तेरभावात् एवं च धूमत्वावच्छिन्नप्रकारताशालि
परामर्शजन्यपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छि
न्नं प्रति धूमत्वविरुद्धधर्मावच्छिन्नप्रकारतानिरूपितविधेयस्वविषयित्वत्वावच्छिन्नप्रकारतानिरूपितपरामर्शत्वावच्छिन्नप्रकारतानिरूपितजन्यता
त्वावच्छिन्नप्रकारतानिरूपितत्वे सति धूमत्वान्यधर्मनिष्ठप्रकारतानिरूपितावच्छिन्नत्वत्वावच्छिन्नप्रकारतानिरूपितविषयित्वत्वावच्छिन्नप्रकारतानि
रूपितपरामर्शत्वावच्छिन्नप्रकारतानिरूपितजन्यतात्वावच्छिन्नप्रकारतानिरूपितायाः पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितासंयोगादिनिष्ठ रामः
सांसर्गिकविषयकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकत्वप्रकारतानिरूपितानुमितिनिष्ठविशेष्यतातच्छालीच्छादिरह विशिष्टपर्वतताव १८

च्छिन्न। हेयकत्वप्रकारतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयकत्वप्रकारतानिरूपितानुमितिनि
ष्ठविशेष्यताशालीच्छाभावत्वादिना तल्लिंगकानुमिति तदन्यलिंगकेच्छाभावयोर्लिंगभेदे न कार्यकारकारणाभावोबोध्यः तेन न हेतुप्रद
र्शितरीत्यैतत्कल्पेप्यनुपपत्तिः विशेष्यतावच्छेदककोटावनुमितिभिन्नविशेष्यतायामन्यलिंगकत्वप्रकारकत्वं तु न निवेश्यते प्रयोज
नाभावात् न चैतत्कल्पेनुमितित्वस्यान्यलिंगकेच्छाभावस्य लिंगभेदेन कारणत्वं कल्पनीयं एवं साध्यनिर्णयाभावरूपपक्षताया अपि तत्तल्लिंगकत्वाघ
टितरूपेणानुमितीच्छायामुत्तेजकत्वमंगीकृत्य प्रत्येकं कारणत्वं कल्पनीयमिति तेन तदपेक्षया तत्तल्लिंगकेच्छाया उत्तेजकत्वमभ्युपगम्य लिंगभेदेनानुमिति
पक्षतयोः कार्यकारणभावकल्पनमेव सम्यगिति वाच्यं तथा सति सिद्धित्वतत्तल्लिंगकेच्छाभावाद्याहार्यारोपत्वानाभावनामेकत्र विवेशेन तेषां परस्परं विशेष्य
विशेषणभावे विनिगमनाविरहेण लिंगभेदेनाहार्यारोपत्वाभावादिघटितगुरुधर्मावच्छिन्नप्रतियोगिताकसाध्यनिर्णयाभावत्वादिनानंतकार्य
कारणभावकल्पनापत्तिरवच्छेदकगौरवं चेत्येतदपेक्षयोक्तरीत्यान्यलिंगकेच्छाप्रतिबंधकत्वमभ्युपेत्य तदभावहेतुताकल्पस्यैव समीचीनत्वात् न
चैतत्कल्पेपि सिद्धिमूलकान्यलिंगकेच्छाकाले तत्तल्लिंगकानुमितेरनुभवसिद्धत्वात् तदुपपत्तये आहार्यारोपत्वानाभावविशिष्टसिद्धि विशिष्टान्य लिं
गकेच्छात्वेन प्रतिबंधकत्वमवश्यमुपेयं तथा च सिद्ध्यन्यलिंगकेच्छादीनां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावद्व

प०क्षता

१९ द्रष्टेरावश्यकतया न तत्तल्लिंगकेच्छायाः उत्तेजकत्वकल्पापेक्षया लाघवावकाशः परंतु गौरवमेवातिरिच्यते अन्यलिंगकेच्छायास्तत्कालीनसिद्धिदशायामनुमित्या
पत्तिवारणाय अन्यलिंगकेच्छासाधारण्येनानुमितीच्छामुत्तेजकीकृत्यातिरिक्तसिद्धिप्रतिबंधकत्वकल्पनाहीतिवाच्यं तत्तल्लिंगकेच्छायाः उत्तेजक
त्वकल्पेऽननुगतानामनुमितिर्जायतामित्याकारकेच्छानां सत्वेनुमित्युपपत्तये तादृशेच्छानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावा अपि सिद्धिप्रति
बंधकतावच्छेदककोटौ निवेशनीयाः एवं तत्तत्कालीनसंयोगविभागादिव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावानामपि विनिगमनाविरहेण
निवेशमावश्यसिद्धभावस्यानंतकार्यकारणभावकल्पनाप्रसक्तिगौरवस्यान्यत्रापि वारयितुमशक्यत्वात् अथान्यलिंगकेच्छायाः प्रतिबंधकत्वकल्पेप्यन्य
लिंगकपरामर्शकाले तल्लिंगकानुमितिप्रतिबंधिकायाः तच्छून्यतादशायां च तदप्रतिबंधिकायाः अत एवाननुगतायाः अनुमितिर्जायतामालोकलिंगक
लिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याद्याकारकसमूहालंबनात्मकानामनुमितिर्जायतामित्याद्याकारकेच्छाकालीनानामालो
कलिंगकपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याकारकाणां वान्यलिंगकेच्छासत्वेन्यलिंगकपरामर्शशून्यकाले तत्तल्लिंगकानुमित्यु
पपत्तये तासां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावा अन्यलिंगकेच्छाप्रतिबंधकतावच्छेदककोटौ निवेशनीयाः समुपदर्शितरीत्या गौरवमस्त्येवे राम०
ति चेन्नैवं अन्यलिंगकेच्छाप्रतिबंधकत्वेप्युक्तस्थलेनुमित्युपपत्तये तत्कालीनाननुगतान्यलिंगकेच्छानामेव तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदानां १९

द्यक्तित्वावच्छिन्नप्रतियोगिताकाभावाश्चान्यलिंगकेच्छाप्रतिबंधकतावच्छेदककोटौ ननिवेश्यंते अपितु तासामन्यलिंगकेच्छाप्रतिबंध
कतावच्छेदककोटौ निवेश्यंते तत्र च तत्कालीनसंयोगविभागादिव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदानामादायविनिगमना
विरहावकाशः तथा सति तद्धानीमत्वनापत्तेः इच्छायां संयोगादिभेदस्य सर्वदा सत्वात् नापि तत्कालीनसंयोगादिव्यक्तीनां समानाधिकरण्य
संबंधावच्छिन्नतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावमादाय विनिगमनाविरहः सामानाधिकरण्यस्य प्रतियोगितावच्छेदकसंबंधविध
यानिवेशेगौरवात ननु चान्यलिंगकेच्छाप्रतिबंधकत्ववादिनापि ताहशेच्छां नांतनद्व्यक्तित्वावच्छिन्नाभावाः सिद्धिप्रतिबंधकतावच्छेदक
कोटाववश्यं निवेशनीयाः अन्यथा तद्धानीं सिद्धिरूपप्रतिबंधकसत्वेनानुमित्यनुत्पादापत्तेः तथा च तत्र तत्कालीनसंयोगादिव्यक्तीनां तत्तद्व्य
क्तित्वावच्छिन्नप्रतियोगिताकाभावानां निवेशमादायविनिगमनाविरहो दुर्वार इति वाच्यं सिद्धिकाले पर्वतो धूमकवह्नि विधेयकानुमितिर्जा
यतामित्याकारकलिंगोदासीनानुगतेच्छायाः सत्वे पर्वतो वन्हिमानित्याकारकानुमितेरुपपन्नत्वेपि सिद्धिप्रतिबंधकतावच्छेदककोटौ ताहशा
नुमितीच्छाभावनिवेशस्यावश्यकत्वे तत्रैवान्यलिंगकेच्छासाधारण्यपर्वतोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारतानि

पक्षता

२० रूपितानुमितिनिष्ठविशेष्यताशालीच्छात्वरूपधर्मावच्छिन्नप्रतियोगिताकानुमितीच्छाभावस्यैव निवेशेन तद्दानीमस्मल्लिंगकेच्छात्मकतादृशानुमि-
तीच्छायाः तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावाः सिद्धिप्रतिबंधकतानवच्छेदककोटौ न तल्लिंगकेच्छोत्तेजकत्ववारिताननिवेश्यं तेय्येनोपदर्शि-
तरीत्याविनिगमनाविरहः स्यात् अपि तु मानत्सिद्धौ नाम्नेव तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाएव तत्रनिवेश्यंते तत्र चोपदर्शितरीत्या न संयो-
गादिभेदमादाय विनिगमनाविरहावकाश इति कृत तल्लिंगकेच्छोत्तेजकत्वकल्पे गौरवावकाश इति चेन्न तीदृशं तदृहितीयपक्षेऽपि तत्रानतुगतेच्छा तत्र
तादृशीच्छाहितीयपक्षे तेऽनुमित्सुपगन्तयेतादृशसिद्धिभेदस्य प्रतिबंधकतावच्छेदककोटौ वश्यं निवेशनीयतया सिद्ध्युत्पत्तिकालेऽपि तादृशभेदविशि-
ष्टसिद्ध्यभावरूपकारणासत्वेन तादृशेच्छोत्पत्तिक्षणेऽपि एवानुमित्यापत्तेर्दुर्वारत्वात् तथा च नयेज्ञानेच्छयोर्यौगपद्यानुपगमात् तस्मात् तल्लिंगकेच्छोत्ते-
जकत्वकल्पे तादृशेच्छानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावानामेव सिद्धिप्रतिबंधकतावच्छेदककोटौ निवेशानुस्यावश्यकतया ततः सम-
मुपदर्शितसंयोगादिव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावानां दायविनिगमनाविरहे ॥ अनंतसिद्धिप्रतिबंधकप्रतिबंधकभावकल्प- राम
नापायपरिहितत्वेयेस्योपदर्शितरीत्या अस्मल्लिंगकेच्छाप्रतिबंधकत्वकल्प एव समीचीनः अत एव दीधितिकारोऽपि लिंगविशेषेणापि च नियंत्रितं पक्षत्व- २०

मितमनेनोक्तं तज्ज्ञलिंगकेच्छोत्तेजकत्वकल्पमनादृत्य तल्लिंगकानुमितौ सिद्धिकालीनतत्तल्लिंगकानुमितीच्छाविरहविशिष्टान्यलिंगकानुमि
तीच्छैव वा प्रतिबंधिकेति ग्रंथेनान्यलिंगकेच्छाप्रतिबंधकताकल्पमेवाहृतवानिति वदंति तन्मंदं अनुमितिर्जायतामित्याकारकाननुगतेच्छा
नामपि त्वदुपदर्शितरीत्यानुगतरूपावच्छिन्नप्रतियोगिताकाभावानामेव सिद्धिप्रतिबंधकतावच्छेदककोटौ निवेशनीयतया तत्तद्व्यक्तित्वावच्छिन्नप्र
तियोगिताकाभावस्यानिवेशेन संयोगादिव्यक्त्यभावमादाय विनिगमनाविरहेणानंतसिद्धिप्रतिबंधकताकल्पनापत्त्यभावेनोपदर्शितरीत्या तल्लिंग
केच्छोत्तेजकत्वकल्पस्यैवातिसमीचीनत्वात् अस्तु तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकानामुपदर्शितानुगतोन्यलिंगकेच्छाभेदानामस्मल्लिं
गकेच्छाप्रतिबंधकतावच्छेदककोटौ निवेशेनान्यलिंगकेच्छाप्रतिबंधकत्वकल्पस्य गौरवग्रस्तत्वेनासमीचीनत्वात् च नन्वेवं वह्नि धनिकारस्यालिं स
गकेच्छाप्रतिबंधकत्वाकल्पादोषसंगत इति वाच्यं अन्यलिंगकेच्छाप्रतिबंधकत्वकल्पनेनाच्छादकस्य वाग्रहोत्याद्यधिनिकारस्यापि लिंगविशेषणा
पि वह्नियत्रेति नपक्षत्वमित्यनेन पूर्वमुक्तं तज्ज्ञलिंगकेच्छोत्तेजकत्वकल्प एवाहृतः अथ तल्लिंगकेच्छोत्तेजकत्वकल्पेपि न समस्य क तत्कल्पे धूमलिंग
कानुमित्यात्मिकं प्रति धूमलिंग[illegible]केच्छाविरहविशिष्टसिद्ध्यभाववत्वादिना कारणत्वं पूर्वोपदर्शितरीत्या वाच्यं तच्च न संभवति पर्वतो व
ह्निव्याप्यधूमवान् पर्वतः पर्वतो वह्निव्याप्यालोकवांश्चेत्युभयलिंगकसमूहालंबनात्मकपरामर्शात् पर्वतो वह्निमानिति सिद्धेः आलोकलिंगक[illegible]पर्व

प॰त॰

२१ तो हि धूपकवह्निविधेयकानुमितिजनकतामित्याकारकेच्छायाश्च स्यमवधानं तत्र विनापि धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावरूपकारणमालोकलिंग

कानुमित्यात्मकधूमलिंगकानुमितेरुत्पन्नत्वाद्व्यभिचारात् · [illegible]तदालोकलिंगकानुमितिरेवोत्पद्यते न तु धूमलिंगिकेति न व्यभिचार इति वा[illegible] · तत्र धू

मालोकपरामर्शयोरैक्ये न धूमपरामर्शजन्यत्वरूपधूमलिंगकत्वाक्रांततया [illegible] तथा वक्तुमशक्यत्वादिति चे[illegible]न · स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व

स्वसामानाधिकरण्योभयसंबंधेन धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वं यन्नद्धिन्नानुमित्यादिकं प्रति धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभा

तें वत्वाविनाहेतुकल्पने नोक्तसमूहालंबनात्मकोभयलिंगकपरामर्शन्यानुमितेरुपदर्शितोभयसंबंधेन धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशि

ष्टत्वेन धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावकार्यतावच्छेदकानाक्रांततया तत्र व्यभिचाराभावात् · [illegible]नैवं सति तत्र धूमपरामर्शसामग्रीवलाद्धूम

ता लिंगकानुमितिरुत्पन्नारे[illegible]सामग्रीवलाद्धि नाधि धूमलिंगकेच्छासिद्ध्यात्मकपरामर्शादनुमित्यापत्तिर्दुर्वारैवेति वा[illegible] धूमलिंगकानुमितेः

धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावघटितधूमपरामर्शादिघटितसामग्र्या आलोकलिंगकेच्छाविरहविशिष्टसिद्ध्यभावघटितालोकपरा

मर्शोभयपरामर्शोभयघटितसामग्र्यन्यतरस्य नियामकत्वकल्पने नोक्तापत्तेरसंभवात् [illegible] · सिद्धिकाले आलोकादिलिंगकपर्वतो हि धूपकवह्नि राम॰

विधेयकानुमितीच्छा हि आपो धूमादिलिंगकपरामर्शाद्धूमादिलिंगकानुमितिवारणाय तत्तल्लिंगकेच्छानुपदर्शितरीत्या हेयत्युक्तेः जकी कृत्यलिंगभेदेन २१

नुमितिपक्षतयोः कार्यकारणभावेन कल्प्यते गौरवात् । किंतु सामान्यतः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयता
निरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति स्वीयवह्निव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यताव च्छेदकीभूतधर्मवल्लिंग
कत्वप्रकारतानिरूपिता या पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितसंयोगादिसंसर्गकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारतानि
रूपितानुमितिनिष्ठविशेष्यतानात्रिरूपकत्वस्वसामानाधिकरण्योभयसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टानुमितीच्छा न हि रहविशिष्ट
पर्वतत्वावच्छिन्नाविशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयत्वाविरहेणानंतकार्यकारणभावप्रसंगेनातिगौरवं । तत्तल्लिंगकेच्छानां तत्तल्लिं
गकेच्छात्वेन पृथग्जनकीकृत्य सर्वलिंगभेदेन कार्यकारणभावभेदे तु तत्तल्लिंगकपरामर्शकालीनतादृशेच्छानां तत्तल्लिंगकानुमितिजनकतावच्छे
दककोटौ देवतत्ताद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावनिवेशेनोपदर्शितरीत्या गौरवमिति तत्तल्लिंगकेच्छानां पृथग्जनकत्वं अभ्युपेत्य लिं सत
गभेदेन पृथक्कार्यकारणभावकल्पनमेव सम्यगिति मान्येरुक्तं तन्निरस्तं । अनुमितिर्जायतामित्याकारकानुगतेच्छानामपि पूर्वोपदर्शि
तरीत्यानुगतरूपेणैवोत्तेजकत्वाभ्युपगमेनोक्तरीत्या गौरवासंभवात् न चैवं सत्यपि लिंगविशेषेणापि च नियंत्रितं पक्षत्वमिति दीधितिग्रंथवि

ध श्रो

रोध इति वाच्यं तर्कनिर्णयेयैर्थं यं विरोधस्य तार्किकैरनादरणीयत्वात्· वस्तुतस्तु तादृशग्रंथस्य लिंगभेदेन पक्षतानुमितिः कार्यकारणभावद्वयस्य च न तात्पर्यं सिद्धि
काले तल्लिंगकपरामर्शकाले तल्लिंगकेच्छासत्वेपि निरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिर्णयत्वावच्छिन्नाभावत्वादिनैव कारणाभावः कल्प्यते तेनाव
नेवालोकादिलिंगकेच्छाया उपदर्शितोभयसंबंधेन धूमादिपरामर्शविशिष्टत्वाभावेनोक्तप्रतिवारणासंभवात् एवं चोपदर्शितसमस्तालंबनात्मकोभ
यलिंगकपरामर्शजन्यानुमितौ न व्यभिचारः तत्रोपदर्शितोभयसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टायामालोकलिंगकेच्छाया एव सत्वेन तथाविधा
नुमितीच्छाविरहविशिष्टसाध्यनिर्णयाभावरूपकारणासंभवत्वात्· यत्तु· तत्तल्लिंगकनिखिलेच्छानामनुगतरूपेणैकत्र निवेशनेनैककार्यकारण
भावेनुमितिजनकतामित्याद्याकारकानुगतेच्छानां तत्तद्व्यक्तित्वेनैव निवेशेन जनकतया तत्तल्लिंगकनिखिलपरामर्शकालीनानां तादृशेच्छानां तत्तद्व्यक्तित्वा
वच्छिन्नप्रतियोगिताकभेदकूटस्यैकत्र निवेशप्रसंगेन तस्य परस्परं विशेषणविशेष्यभावे विनिगमनाविरहः पक्षतायामवधानं तदानीमेवोपदर्शितोभय
संबंधेनोक्तेच्छाया वह्निव्याप्यवत्ताभिलापविशिष्टत्वसंभवात् नान्यलिंगकेच्छायाः काले तदानींतनस्य उक्तोभयसंबंधेन तादृशाभिलाषविशिष्टत्वा
संभवात्· पक्षतायां लिंगाविशेषणानि पंचमग्ये तदेव यत्सिद्धिकाले तल्लिंगकपरामर्शकाले तल्लिंगकेच्छासत्वे एव संभवः नियंत्रणस्य सर्वदा ज्ञानाभा रामः
वरूपत्वादित्युक्तौ न्यासत्वे लिंगसाधारण्येन कार्यकारणभावे एव तात्पर्यमिति न तादृशग्रंथविरोधसंभावनापि· अत एव लिंगाविशेषितापि च भिन्नपक्षताभि २२

त्तिनोक्तं किं तु निर्यंत्रितमिति· अन्यथा संशयफले स्वनानिर्बधपतो दीधितिकारस्य तादृशग्रंथलिखनं विरुध्येत तादृशलिखनानुपपत्तेरिति पुक्तमुक्तमस्माभिः॥ ननु
यद्दर्शितरीत्या सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिहेतुत्वे यत्र नैसिषाधयिषा ततो लिंगज्ञानं ततः सिद्ध्यात्मकपरामर्शस्तत्र तदनंतर
मनुमितेरानुभविकतया तदनुपपत्तिः तत्र परामर्शोत्पत्तिक्षणे सिषाधयिषानाशेन सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपकारणस्य तत्सत्त्वे म
त्वादिति चेन्न· तत्र परामर्शोत्पत्तिक्षणे एव तत्र सिषाधयिषाया नाशोपि तद्द्वितीयक्षणे तत्र सिषाधयिषां तत्तृतीयक्षण एवानुमितेरंगीकारात्·
न च क्षणविलंबकल्पनापत्तिरिति वाच्यं· अनायत्यात्तत्कल्पनाया अदोषत्वात्· अन्ये तु· सिषाधयिषाविरहविशिष्टोयः स्वाधिकरणक्षणाव्यवहि
तोत्तरक्षणोत्पत्तिकानुमितिकत्वं तदुत्तरैकक्षणविशिष्टायाः सिषाधयिषाविरहविशिष्टायाः सिद्धेरभावः पक्षता तस्या एव वानुमितिं प्रति
कारणत्वं स्वीक्रियते· एवं चोपदर्शितस्थले परामर्शोत्पत्तिद्वितीयक्षणे नानुमितेरनुपपत्तिः तत्र तथाविधसिद्ध्यधिकरणीभूतो यस्तदुत्पत्तिक्षण
द्व्यवहितोत्तरद्वितीयक्षणोनुमितेरुत्पादात् तत्र तत्सिद्धेस्तथाविधस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया तद्भिन्नत्वाभावेन
तथाविधसिद्धेरुक्तविशिष्टसिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपस्यानुमितिकारणस्य सत्त्वात्· अत्र प्रथमक्षणे सिषाधयिषाविरहे वाशिष्टानिवे
शयत्र द्वौ सिषाधयिषा ततः सिद्धिस्ततः परामर्शस्तत्र परामर्शोत्पत्तिद्वितीयक्षणेनुमितेरनुपपत्तिः तत्र सिद्ध्युत्पत्तिक्षणस्य पोद्वितीयक्षणस्याव्यवसा

२३ धारणाप्रसिद्धिच्छाधिकरणक्षणानव्यवहितोत्तरत्वस्य स्वाश्रयीभूतो यस्मिन्नुमतिक्षणो न द्वितीयक्षणात्तत्रानुमितेरनुपपत्तेः तत्र स्वाधिकरणक्षणानव्यवहितोत्तरक्षणो
त्पत्तिकानुमितिकभिन्नत्वापाः सिषाधयिषाविरहविरहविशिष्टसिद्धेः सत्वात् प्रथमक्षणे सिषाधयिषाविरह वैशिष्ट्यनिवेशेऽनुसिषाधयिषाविरहविशिष्टसिद्ध्य
धिकरणक्षणाः परामर्शोत्पत्तिक्षण एव तदव्यवहितोत्तरद्वितीयक्षणेऽनुमितेः सत्वात् तत्र तत्सिद्धेस्तथाविधानुमितिकत्वेन तद्भिन्नसिद्ध्यभावस्य तत्र सत्वा
न्नोक्तानुपपत्तिः नच प्रथमक्षणे इच्छाविरहवैशिष्ट्यनिवेशे दोषानुपपत्तिपरिहारसंभवेन सिषाधयिषापर्यन्तानुसरणमफलमिति वाच्यं नवीनन
ये ज्ञानेच्छयोर्युगपदुत्पत्तेरभ्युपगमेन प्रथमानुमित्यात्मनी पक्षणे घटेच्छासीध्यात्मकपरामर्शोत्तरं चानुमितिस्तत्र तादृशसिद्धेरिच्छाविरहविशिष्ट
स्वाधिकरणाप्रसिद्ध्या इच्छाविरहविशिष्टस्वाधिकरणाभरणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वमात्रसिद्धेः सिषाधयिषाविरहविशिष्टतद
भावस्य परामर्शक्षणे सत्वात्तदुत्तरमनुमितेरनुपपत्तिः सिषाधयिषापर्यन्तानुसरणसावश्यकत्वान्नसिषाधयिषाविरहविशिष्टक्षणस्य स्वाधिकरणत्व
निवेशे सर्वेषामेव क्षणानां सिषाधयिषाविरहविशिष्टपूर्वपूर्वक्षणाधिकरणकालध्वंसाधिकरणत्वेन यावत्तादृशाधिकरणध्वंसानधिकरणत्वरूपाव्यवहितत्वा
प्रसिद्ध्याप्रसिद्धिरूपतः सिषाधयिषाविरहविशिष्टक्षणस्य स्वाधिकरणत्वनिवेशः यत्र सिषाधयिषाप्रत्यक्षिकसिद्धिपरामर्शानुमितयः क्रमेणोत्पन्नाः रा०म०
तत्र सिषाधयिषाद्वितीयक्षणावच्छेदेन सिषाधयिषाविरहविशिष्टो यः सिद्धस्वाधिकरणक्षणो मानसप्रत्यक्षात्मकसिद्धेरेकालोपाधिः तत्र सिषाधयि २३

ञाभावाधिकरणासिद्ध्यधिकरणासाव्यवहितोत्तरपरामर्शोत्पत्तिक्षणेऽनुमितेरनुत्पत्त्या तथाविधानुमितिजनकभिन्नायामि — सत्त्वेनपरा
मर्शो द्वितीयक्षणेऽनुमितेरनुत्पादप्रसङ्गः प्रथमक्षणोत्पादाने तस्मिन् सिषाधयिषाविरहविशिष्ट तादृशसिद्ध्यधिकरणोभ
तयपरामर्शोत्पत्तिक्षणाव्यवहितोत्तरक्षणेऽनुमितेरुत्पत्त्या तत्र च सिद्धेस्तथाविधानुमितिजनकत्वेन तन्निरुक्तसिद्ध्यभावस्य तत्र स
त्त्वान्नानुपपत्तिः यत्र हि द्वौ लिङ्गपरामर्शौ तत्र तादृशक्षणोत्पन्नपरामर्शोत्तरमनुमितिरुत्पन्ना तत्र सिद्धेः स्वाधिकरणक्षणोत्पन्नतादृशानु
मितिजनकतया तन्निरुक्तत्वाभावेन सिद्धिकालेऽपि तथाविधमेकक्षणविशिष्टसिद्ध्यभावरूपकारणासत्त्वात् द्वितीयक्षणेऽनुमित्यापत्तिर
तो द्वितीयक्षणे अव्यवहितत्वनिवेशः तत्र स्वाधिकरणाकालध्वंसाधिकरणकालध्वंसानधिकरणासमतोनोक्तानुपपत्तिः यत्र सिद्ध्या
कपरामर्शाव्यवहितक्षणे सर्वेषामनुमितिरुत्पन्ना तत्र तत्र सिद्धेः॥ तथाविधाव्यवहितो यः सर्वक्षणः तद्वृत्तित्रिकालानु
मितिजनकतया तन्निरुक्तत्वाभावेन तादृशमेकक्षणविशिष्टसिद्ध्यभावरूपानुमितिकारणासत्त्वासिद्धिरपि सत्त्वात्तस्मि

२४ द्वितीयक्षणेनुमित्यापत्तिरतो द्वितीयक्षणे उत्तरत्वनिवेशः तत्र च साधिकरणकालध्वंसाधिकरणत्वं अतो नो
क्तानुपपत्तिः यत्राद्यानुमितित्वं तदुत्तरदृश्यक्षणे परामर्शसिद्धिः तत्रानन्तरसिद्धितो या क्षणद्वये तत्स्थायी
अनुमित्युत्पत्त्यधिकरणो भवतीयः स तु एककालस्तमादृशः यत्तादृशसिद्धेरपि तादृशाव्यवहितोत्तरकालोत्पत्तिका
१ नुमितिकतया तादृशसिद्धिकालेपि तथाविधानुमितिकभिन्नसिद्ध्यभावसत्त्वेन तद्द्वितीयक्षणे नुमित्याप
त्तिरतो द्वितीयक्षणानाद्यपरामर्शद्वितीयक्षणोत्पन्नानुमितावपि तथाविधाव्यवहितोत्तरत्वघटितत्वात्त्रि
त्वात्मकानुमितिकतया तादृशानुमितिकालेपि तथाविधसिद्ध्यभावइत्यकारणसत्त्वान्निष्ठतोपक्षणोनन्तरानुमि
त्यापत्तिरत उक्तं तृतीयत्वविशिष्टसामग्र्यात्मकपरामर्शद्वितीयतृतीयेत्यं सिषाधयिषात तत्क्षणानुमितित्वविशिष्टसिद्धिद्वितीय
क्षणे नामिमानुरु तथाविधानुमितिकभिन्नायाः सिद्धेः सिषाधयिषाकालेपि सत्तात्रा द्वितीयक्षणाभ्युमितेरनु
त्वाद्यापत्तिरतः सिद्धौ सिषाधयिषाविरहविशिष्टत्वनिवेशः सिषाधयिषाविरहविशिष्टपरामर्शो व्यवहित २४

तद्वृत्तिक्षणे सत्त्वाविशेषणाग्रहस्योपदर्शितरीत्या तथाविधानुमितिकभिन्नक्षणपरामर्शोत्पत्तिकाले सत्वात् द्वितीयक्षणोनुमितेरनुदयापत्तेरतः सिद्धि
पदोपादानं: नन्वेवमपि असिद्धाद्यपिषानाशोत्पत्तिकालीनसिद्धिरूपन्नात्ततः परामर्शक्षणे तदीयानुमितिस्तत्रानुमित्युत्पत्तिक्षणस्य सिषाधयिषा
विशिष्टस्याधिकरणोत्पत्तीयः सिद्ध्युत्पत्तिक्षणः ॥ क्षणः ध्वंसाधिकरणीभूततीयः परामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धेः सिषाध
यिषाविरहविशिष्टोयः स्वाधिकरणक्षणस्त्वव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वाभावेन तथाविधसिद्धेः विशिष्टोपादानात्सि
द्धेस्तत्र परामर्शोत्पत्तिक्षणे सत्वेन तद्द्वितीयक्षणेनुमितेरनुदयाय ॥ न्नेदेवीवेतियेक्षः स्वध्वंसाधिकरणीभूतकालध्वंसानधिकरणत्वेन
पसे स्वाधिकरणक्षणाव्यवहितोत्तरत्वस्यापि नानिवेशेनोपदर्शितस्थलेनुमित्यधिकरणक्षणस्य सिद्धिध्वंसानधिकरणतया तदधिकरणा
कालध्वंसानधिकरणातथाविधोक्तसिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणक्षणाव्यवहितोत्तरत्वस्य तत्र सत्वेन तत्र सिद्धेस्तथाविधानुमितिकत्वपा
तद्भिन्नत्वाभावेनोपदर्शितानुपपत्तेः परीहारसंभवात् नचैवं सति द्वयमक्षेपि सिषाधयिषाविरहवैशिष्ट्यनिवेशनैयर्थ्यं यत्र सिषाधयिषासिद्धिपरामर्शा
नुमितयस्तत्र सिद्धेर्निरुक्ततथाविधाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेन तदानीं तत्र तद्व्याप्तेरसंभवादिति वाच्यं यत्र सिद्ध्यव्यवहितक प
रामर्शसिषाधयिषानुमितयः क्रमेणोत्पन्नास्तत्र सिद्धेर्निरुक्ततथाविधाव्यवहितोत्तरक्षणोत्पत्तिकतया तद्भिन्नत्वाभावेन सिद्ध्युत्पत्तिक्षणोत्पन्नथावि

धर्मिद्वमावच्छिन्नप्रकारतासत्वेनतद्धितीयक्षणेनुमित्यापत्तिवारणायाव्यवहितोत्तरक्षणेस्वसिषाधयिषाविरहवैशिष्ट्यनिवेशेनद्वयमक्षणेसिषाधयिषाबाधयिषा
२५ विरहवैशिष्ट्यानिवेशेइष्टापत्तेः।नचसिषाधयिषाक्षणेपिसिषाधयिषानधिकरणदेशावच्छेदेनसिषाधयिषाविरहवैशिष्ट्यासत्वेनाव्यवहितोत्तरक्षणेतन्निवेशे
प्युक्तापत्तिस्तेनेदवस्थैवेतिवाच्यं।स्वावच्छेदकशरीरावच्छेदेनावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकसिषाधयिषाविरहाधिकरणत्वरूपस्यैव
सिषाधयिषाविरहवैशिष्ट्यस्यात्रनिवेशात्।नचक्षणद्वयमाधारतायोपदर्शिताव्यवहितोत्तरत्वस्यनिवेशेसिद्धिपदनिवेशमनर्थकंपराम
र्शाव्यवहितेत्तिसर्वेषामत्रविशेषणातानादेर्निरुक्ततथाविधाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतयातद्भिन्नत्वाभावेनदर्शितरीत्यातद्वारणसंभवा
दितिवाच्यं।तत्रज्ञानमात्रार्थकसिद्धिपदानिवेशेसर्वत्रतथाविधाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसत्वद्रव्यत्वादेरात्मनिसर्वदासत्वेनक
दाप्यनुमित्यसत्वापत्तेनस्यादितिज्ञानमात्रार्थकसिद्धिपदनिवेशस्यावश्यकत्वादित्याहुः।तत्रतपक्षतानुमित्योर्लाघवेनविशेष्यतावच्छेदकनिष्ठप्रत्या
सत्ताकार्यकारणभावकल्पेविशेष्यतावच्छेदकतासंबंधेनानुमितिंप्रतितथाविधानुमितिकभिन्ननिष्ठविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्र
तियोगिताकाभावस्यहेतुत्वकल्पनेनसत्तादृव्यत्वादेस्तथाविधानुमितिकभिन्नत्वेपिविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकतदभा राम०
वस्यकेवलान्वयिनः।सर्वदाविशेष्यतावच्छेदकेसत्वेनोक्तानुपपत्तेरभावेनज्ञानमात्रार्थकसिद्धिपदस्यापिवैयर्थ्यात्कारणतावच्छेदककोटिप्रविष्टाभे

दकं टस्य परस्परविशेषणविशेष्यभावे विनिगमनाविरहप्रयुक्तानंतकार्यकारणभावकल्पनापेक्षया सिषाधयिषाविनाशसमयकालोत्पन्नसिद्ध्यात्मकप
रामर्शोत्पत्तिः षाधयिषानंतरोत्पन्नकं तरेरं एवं लक्षणाविलंबेनानुमित्युभयगमस्यैवौचित्यत्वाच्च· एतेनानुमित्सोत्तरसिद्धिसत्वे यत्र पक्षणोनरमनुमितिस्तत्र पक्ष
णानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटमेव सिद्धिप्रतिबंधकतावच्छेदककोटौ निवेशनीयं· एवं च लक्षणाविलंबकल्पनीविनैव सिषाधयि
षोत्तरत्ती पक्षणोस्य त्रसिद्ध्यात्मिकपरामर्शादनुमितिनौ वीहरू त्यपि निरस्तं तादृशाभावकूटस्य परस्परविशेषणविशेष्यभावे विनिगमनाविरहप्र
युक्तानंतकार्यकारणभावकल्पनापेक्षया लक्षणाविलंबकल्पनाया एव लघुत्वात· अथ समवायमपि सिषाधयिषाघांसमवायसंबंधावच्छिन्नप्रति
योगिताकतदभावस्य दैशिकविशेषणतया सिद्धौ सत्वेन सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यासत्वादनुमितेरनुपपत्तिः नच समवायसंबंधावच्छि
न्नप्रतियोगिताकसिषाधयिषाभावस्य सामानाधिकरण्यसंबंधेन विशिष्टसिद्धौ निवेशान्नोक्तापत्तिरिति वाच्यं ज्ञानादेरात्मविशेषगुणस्याव्याप्यवृत्तित
या सिषाधयिषासत्वेपि सिषाधयिषाभावस्यात्मनि संभवेन तत्प्राप्त्यनिस्तारादिति चेन्न एककक्षणावच्छेदेनैकात्मवृत्तित्वरूपसामानाधिकरण्यसंबंधाव
च्छिन्नप्रतियोगिताकसिषाधयिषाभावस्य दैशिकविशेषणतया विशिष्टस्य सिद्धौ निवेशेनात्मविशेषगुणानां समवायसंबंधेनाव्याप्यवृत्तित्वेपि सामा
नाधिकरण्यसंबंधेन व्याप्यवृत्तितया सिषाधयिषासत्वे सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकसिषाधयिषाभावस्यासिद्धावसंभवेनोक्तानु

२६ पर्पनेऽभावात् एवमप्रामाण्यज्ञानास्कंदितसिद्धिकालेऽनुमितेरुत्पत्त्यापक्षतानिष्ठानुमितिजनकतावच्छेदककोटौ स्वविशेष्यत्वस्वसामानाधिकरण्योभयसंबं
धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभाववैशिष्ट्यमपि सिद्धौ निवेशनीयं· एवमाहार्यसिद्धिकालेऽप्यनुमितिनिर्वाहायानुमितिजनकतावच्छेदक
कोटावनाहार्यत्वमपि सिद्धौ निवेशनीयं· तच्चाननुगताहार्यत्वस्य दुर्वचत्वात् तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वरूपमेव· न चैवं भेद
कूटस्य परस्परविशेषणविशेष्यभावे विनिगमनाविरहप्रयुक्तानंतकार्यकारणभावकल्पनापत्त्या गौरवमिति वाच्यं· अननुगतत्वानादृशगौरवस्य
प्रामाणिकत्वेन दोषावहत्वाभावात्· पर्वतो वह्निमान्न वेत्याकारकसंशयकाले पर्वतो वह्निमानित्याकारकानुमितेरुत्पत्त्या निर्णायत्वस्य प्रतिबं
धकतावच्छेदककोटौ निवेशः न तत्र निर्णायत्वं यदि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रतियोगिताकात्यंताभावप्रकारताशू
न्यत्वघटितं तदा वह्निमद्भेदकोटिकसंशयस्यापि प्रतिबंधकत्वापत्तिः यदि च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रतियोगिता
वच्छेदकताकभेदप्रकारताशून्यत्वघटितं तदात्यंताभावकोटिकसंशयस्यापि प्रतिबंधकत्वापत्तिः न चोभयाकारत्यात्यंताभावप्रकारताशून्यत्वस्य भे
दप्रकारताशून्यत्वस्य च निर्णायत्वघटकतया न दोषः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितायावह्नित्वविशिष्टप्रकारतावच्छून्यत्वमेव निर्णा राम
यत्वघटकं प्रकारतायावह्नित्वनिष्ठा च स्वावच्छिन्नप्रतियोगिताकात्यंताभावत्वावच्छिन्नत्वत्वावच्छिन्नप्रतियोगितावच्छेदकताकभेदत्वावच्छिन्नान्

तरसंबंधेनवाच्यमतोनोक्तापत्तिरितिवाच्यंतथापिपर्वतोवह्निमान्द्रव्यत्ववान्वेतिभावद्वयकोटिकसंशयस्यापिप्रतिबंधकत्वापत्तेर्दुर्वारत्वा
त्· नचभावद्वयकोटिकसंशयोनस्वीक्रियतेअयंस्थाणुर्वापुरुषोवेत्यादिसंशयानांचस्थाणुर्नेनायंपुरुषोवेतिचतुष्कोटिकसंशय
त्वमेवस्वीक्रियतइतिनोक्तापत्तिरितिवाच्यःतथापिपर्वतोवह्न्यभाववान्वह्निमांश्चेतिसमुच्चयात्मकनिर्णयस्यप्रतिबंधकत्वा
नुपपत्तितादवस्थ्यात्· अथसाध्याभावप्रकारतायांविरोधावच्छिन्नत्वनिवेशान्नोक्तानुपपत्तिः संशयसमुच्चययोर्वैलक्षण्या
नुपपत्त्यासंशयेसर्वत्रविरोधोभासतेनतुसमुच्चयइत्यभ्युपगमेनसंशयवारणस्यसमुच्चयसंग्रहस्यचसंभवात्· नचयत्रसंशये
भावकोटावेवविरोधोभातःनत्वभावकोटौतत्रसंशयवारणानसंभवतीतिवाच्यं· विनिगमनाविरहेणोभयकोटावेवविरोधभा रामः

नीगीकारात् न च विरोधानुपस्थितिकालीनसंशयेविरोधभानंनसंभवतीतिवाच्यं तत्रप्रकारतयाभानासंभवेपिसंसर्गघटकतयाभानेबाधका
भावादितिचेन्न दैशिकविशेषणतापान्नविरोधीयाद्याकारकबाधनिर्णयदशायांविरोधावच्छिन्नत्वेनदैशिकविशेषणतायाःसंसर्गतया
भानासंभवेनतत्रतत्संशयीयवन्ह्यभावप्रकारतायाविरोधावच्छिन्नत्वाभावेननतत्संशयवारणस्याशक्यत्वादितिचेन्नैवंसामानाधिकरण्य
मात्रावगाहिसाध्यनिर्णयस्यप्रतिबंधकतायांपर्वतत्वावच्छिन्नविशेष्यतानिरूपितपर्वतत्वावच्छिन्नत्वविशिष्टदैशिकविशेषणतासंस
र्गावच्छिन्नवन्ह्यभावप्रकारताशून्यत्वघटित। निर्णायकत्वनिवेशपतेऽवच्छेदकावच्छेदेनसाध्यनिर्णयस्यप्रतिबंधकतायांचपर्वतत्वा
वच्छिन्नविशेष्यतानिरूपितदैशिकविशेषणतासंसर्गावच्छिन्नवन्ह्यभावप्रकारताशून्यत्वघटितनिर्णायकत्वनिवेशपतेः एवंचसंशयप
समुच्चययोर्वैलक्षण्यायावच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानंसंशयःसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानंसमुच्चयइतिनि
यमांगीकारेणसमुच्चयस्यसामानाधिकरण्यमात्रावगाहिसाध्यनिर्णयप्रतिबंधकतावच्छेदकाक्रान्तत्वंसंभवत्येव तत्रपर्वतत्वावच्छिन्नत्ववि रामः
शिष्टदैशिकविशेषणतासंसर्गावच्छिन्नवन्ह्यभावप्रकारताशून्यत्वन१

रामः

घटितनिर्णयत्वसत्वात्ः सामानाधिकरण्येनवन्हिकोटिकसंशयेचनिरुक्तवन्ह्यभावप्रकारतायाःसत्वान्नतच्छून्यत्वघटितनिर्णयत्व
मितिनतस्यसामानाधिकरण्यमात्रावगाहिसाध्यनिर्णायस्यछलीपप्रतिबंधकतावच्छेदकाक्रांतत्वंअवच्छेदकावच्छेदेनवह्निकोटिकसंश
येचदैशिकविशेषणतासंसर्गावच्छिन्नवन्ह्यभावप्रकारताशालित्वेननतच्छून्यत्वघटितनिर्णायत्वमितितस्यानावच्छेदकावच्छेदेनसाध्यनि
र्णयस्यछलीपप्रतिबंधकतावच्छेदकाक्रांतत्वं· यन्तु· अवच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानंसंशयःसामानाधिकरण्येनोभयकोट्य
वगाहिज्ञानंसमुच्चयइतिनियमोनसंभवति· तथासतिसंयोगतदभावयोरव्याप्यवृत्तित्वग्रहदशायांजायमानस्यास्यद्रव्यत्वावच्छेदेनसंयोगतद
भावयोर्ग्रहस्यसमुच्चयत्वानुपपत्तेः अव्याप्यवृत्तित्वग्रहाभावदशायांजायमानस्यसामानाधिकरण्येनपरस्परविरुद्धत्वेनतत्तदभावोभयप्रकारक
ज्ञानस्यसंशयत्वानुपपत्तेश्चेतिनवीनैरुक्तंतदसत्· अव्याप्यवृत्तित्वग्रहस्यसामानाधिकरण्येनतत्प्रकारकज्ञानंप्रत्येवहेतुतयासंयोगतदभावयोरव्या
प्यवृत्तित्वग्रहदशायांद्रव्यत्वावच्छेदेनसंयोगतदभावोभयप्रकारकज्ञानोत्पत्तेरसंभवात्अव्याप्यवृत्तित्वग्रहाभावदशायामव्याप्यवृत्तित्वग्रहस्यका
रणाभावेनसामानाधिकरण्येनतत्तदभावोभयप्रकारकज्ञानासंभवाच्च· अथ तथापिनीलपर्वतोवन्ह्यभाववान्पर्वतोवह्निमान्पर्वतोमहानसी

२८ यद्वन्ह्यभाववान्पर्वतो वह्निमानित्येतादृशनिर्णयस्यानुमितिप्रतिबंधकत्वानुपपत्तिः तत्साध्याधिकं त्विति न्यायेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपित
वह्नित्वावच्छिन्नाभावप्रकारताशालित्वेन तच्छून्यत्वघटितनिर्णयत्वानाक्रांतत्वात् । न च पर्वतत्वान्यधर्मानवच्छिन्नविशेष्यतानिरूपितवह्नित्वान्य
धर्मानवच्छिन्नप्रतियोगिताकाभावप्रकारताच्छून्यत्वघटितनिर्णयत्वनिवेशान्नोक्तानुपपत्तिरिति वाच्यं तथा सत्येकत्र द्वयमिति रीत्या नीलत्वपर्व
तत्वोभयावच्छिन्नविशेष्यताकस्य महानसीयत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताकाभावप्रकारकस्य चोक्तनिर्णयस्य प्रतिबंधकत्वायत्तावपि
सामानाधिकरण्यसंबंधेन नीलत्वविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकस्य सामानाधिकरण्यसंबंधेन महानसीयत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगि
ताकाभावप्रकारकस्य चोक्तनिर्णयस्य प्रतिबंधकत्वानुपपत्तितादवस्थ्यात् । जातिमान्वन्ह्यभाववान्पर्वतो वह्निमान्पर्वतो जातिमद्वह्न्यभाववान्पर्वतो व
ह्निमानित्याकारकनिर्णयस्य प्रतिबंधकत्वानुपपत्तेश्च न च शून्यत्वप्रतियोगितावच्छेदककोटौ विशेष्यतायां पर्वतत्वनिष्ठनिरवच्छिन्नत्वावच्छेद रामः
कत्वस्य प्रतियोगितायां च वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकत्वस्याधिकस्य निवेशान्नोक्तापत्तिरिति वाच्यं तथापि जातिमान्पर्वतो वन्ह्यभा
ववान्पर्वतो वह्निमान्पर्वतो जातिमद्वन्ह्यभाववान्पर्वतो वन्हिमानित्याकारकनिर्णयस्य प्रतिबंधकत्वानुपपत्तितादवस्थ्यात् । न च स्वत्वनिष्ठनिरवच्छिन्नाव

च्छेदकताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नपर्वतत्वनिष्ठप्रतियोगिताकाभावविशिष्टविशेष्यतानिरूपितायास्त्वनिष्ठनिरवच्छिन्ना
वच्छेदकताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नवह्नित्वनिष्ठप्रतियोगिताकाभावविशिष्टप्रतियोगिताकाभावप्रकारतात
च्छून्यत्वघटितनिर्णयत्वाविशेषात्तद्दोष इति वाच्यं । तथा सति नीलपर्वतो वह्निमान्कपर्वतस्सुंदरवह्निमान्नवा जातिमान्वह्निमान्नवा जातिमान्पर्व
तो वह्निमान्नवा पर्वतो जातिमद्वह्निमान्नवेत्यादिसंशयानामपि प्रतिबंधकत्वापत्तेरिति चेन्न । निरुक्तप्रकारताश्रयत्वसति स्वनिष्ठनिरवच्छिन्नाव
च्छेदकताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नपर्वतत्वनिष्ठप्रतियोगिताकाभावविशिष्टविशेष्यतानिरूपितायास्त्वनिष्ठनिरवच्छिन्नाव
च्छेदकत्वसंबंधिताभिन्नावच्छेदकतानिरूपकत्वसंबंधावच्छिन्नवह्नित्वनिष्ठप्रतियोगिताकाभावविशिष्टप्रकारताशालिज्ञानत्वस्य निर्ण
यत्वस्य पर्वतो वह्निमानित्यनुमितिप्रतिबंधकतावच्छेदककोटौ निवेशनानुपपत्तेरभावात् । नचैवं नीलपर्वतो वह्निमान्नवेतः सुंदरवह्निमानित्या
दिनिर्णयानां पर्वतो वह्निमानित्यनुमितौ प्रतिबंधकत्वानुपपत्तिरिति वाच्यं । तेषां पर्वतो वह्निमानित्यनुमितौ तो स्वातंत्र्येण प्रतिबंधकत्वांतरस्य कल्प
नात् । परंतु । नीलपर्वतो वह्निमान्नवेतःसुंदरवह्निमानित्याद्यनुमितौ तादृशनिर्णयानां प्रतिबंधकत्वे कल्पनीये पर्वतो वह्निमानित्याकारकानु

२८ मितिसाधारण्यस्य पर्वतत्वातिरिक्तं यन्नीलत्वातिरिक्तं तदनवच्छिन्नोद्देश्यतानिरूपितवह्नित्वान्यधर्मानवच्छिन्नविधेयताकानुमितित्वपर्वतत्वान्यधर्मानु
वच्छिन्नोद्देश्यतानिरूपितवह्नित्वान्यसौंदर्यभिन्नयावद्धर्मानवच्छिन्नविधेयताकानुमितित्वादेः प्रतिबध्यतावच्छेदकस्योपगमेनैव पर्वतो वह्निमानित्याकारकानुमिते
रपि तादृशनिर्णयदशायामापत्तिवारणसंभवे न पर्वतो वह्निमानित्याकारकानुमितेस्तादृशसाध्यनिर्णयानां दृष्टत्वरूपप्रतिबंधकत्वनकल्पने। न चैवं प्रति
बध्यतावच्छेदकगौरवमिति वाच्यं नीलसुंदरपर्वतो वह्निमान् पर्वतः प्रमेयसुंदरवह्निमानित्याद्यनुमितौ व्यभिचारवारणाय तादृशधर्मस्य प्रतिबध्यतावच्छे
दककोटौ गौरवस्यावश्यकत्वादिति तदसत्। तथा सति नीलपर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतां पर्वतोद्देश्यकसुंदरवह्निविधेयकानुमितिर्जाय
तामित्याकारकेच्छाभावस्य पर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याकारकेच्छाभावस्य चैकत्र निवेशप्रसंगेनैकविधानुमितीच्छुकालेपरानुमितिसामग्री
कालेपरानुमित्यापत्तेरितीच्छाया उत्तेजकत्वानुरोधेन प्रत्यक्षप्रतिबंधकत्वकल्पनस्याकृतत्वात् प्रकारांतरेण निर्णायकत्वनिर्वचनमनंतपदउक्तदिशा सुधीभिरत्रापि
बोध्यमिति संक्षेपः। ननु तथापि सिषाधयिषाविरहविशिष्टसाध्यनिर्णयाभावस्य केन संबंधेनानुमितिप्रतिहेतुत्वं स्वीक्रियते न च दैशिकविशेषणतासंबंधेने रामः
वतस्य हेतुत्वं स्वीक्रियत इति वाच्यं विशिष्टाभावस्य विशेष्याभावविशेषणाभावानतिरिक्तत्वेन विशेषणीभूतस्य सिषाधयिषाविरहस्य योभावस्तत्र युक्ता सिषा

धयिषाधुविरहविशिष्टसाध्यनिर्णयोऽभावस्य सिषाधयिषाविरहाभावरूपतया तस्य सिषाधयिषारूपत्वयोर्दैशिकविशेषणतासंबंधेनावृत्तितया सिषाधयि
षाकालीनसाध्यनिश्चयदशायामनुमितेरनुपपत्तेः न च तर्हि समवायसंबंधेन तस्य हेतुतास्त्विति वाच्यं तत्र सिषाधयिषा नास्ति सिद्धिर्नास्ति तत्र तादृशविशिष्टाभा
वस्य विशेष्यीभूतसिद्ध्यभावरूपतया तस्य समवायसंबंधेनावृत्तितया तत्रानुमितेरनुत्पत्तेः न च भावाभावसाधारणविशेषणतायाः स्वीकारेण तादृशविशिष्टाभाव
स्य दैशिकविशेषणसंबंधेन हेतुत्वे न किमपि बाधकमिति वाच्यं भावाभावसाधारणविशेषणतायां मानाभावात् एवं दैशिकविशेषणताविशेषसंबंधेनैव साध्यनि
र्णयाभावस्य हेतुतांगीकारे तत्साध्यनिश्चयस्याव्याप्यवृत्तितया साध्यनिर्णयकालेऽपि तदभावस्य सुलभतया सिषाधयिषाकालीनसाध्यनिर्णयदशायामनुमित्य
नुपपत्तेरभावात् न चैवं सिषाधयिषाशून्यकालीनसाध्यनिर्णयदशायामप्यनुमित्यापत्तिरिति वाच्यं सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकोऽयः सिषाध
यिषाविरहविशिष्टसाध्यनिश्चयाभावस्तादृशविशिष्टोऽयः साध्यनिर्णयाभावः तत्त्वेनैव हेतुतायाः स्वीकारेणोक्तापत्तेरभावात् एतेन तादृशसाध्यसाध्यनिर्णया
भावस्य तादृशसाध्यनिर्णयप्रतियोगिकाभावत्वेन न हेतुता साध्यनिर्णयकालेऽपि साध्यनिर्णयघटोभयाद्यभावाद्यभावस्य सत्त्वादनुमित्यापत्तेः नापि
तादृशसाध्यनिर्णयत्वावच्छिन्नप्रतियोगिताकाभावत्वेन प्राचीनमते ध्वंसप्रागभावाधिकरणे सामान्याभावस्यासत्त्वेन साध्यनिर्णयत्वावच्छिन्नाभाव

२

३० स्यान्मनि करूप्यसत्वे नानुमितेरनुपपत्तेरित्यपि परास्तं साध्यनिर्णयकालीनसाध्यनिर्णयघटोभयाभावस्य समानाधिकरणपसंबंधावच्छिन्नप्रतियो
गिताकोक्तसाध्यनिर्णयाभावे वैशिष्ट्यविरहेणैव बाधस्य संभवेनोक्तरीत्या तादृशसाध्यनिर्णयप्रतियोगिकाभावत्वेन हेतुत्वे बाधकाभावात् वस्तु
तस्तु नवीनत्वे विशिष्टाभावस्यातिरिक्ततया ध्वंसप्रागभावाधिकधिकरणे सामान्याभावस्य सत्वेपि बाधकाभावेनासिसाधयिषाविरहविशिष्टसाध्यनिर्णयत्वा
वच्छिन्नप्रतियोगिताकाभावत्वेनैव तादृशाभावस्य दैशिकविशेषणतासंबंधेनात्मनि प्रतिहेतुत्वमंगीक्रियतेस्त्वनंतपदर्शितविशेषणवैशिष्ट्यमपि तादृशाभा
वे नीवेशनीयप्रयोजनाभावात्· न चैवं साध्यनिर्णयस्याव्याप्यवृत्तितया साध्यनिर्णयकालेपि तादृशसाध्यनिर्णयत्वावच्छिन्नाभावस्यात्मनि सत्वे नानुमित्याय
त्तिर्दुर्वारेति वाच्यं· स्वसमानाधिकरणैककरणैकत्वसंबंधावच्छिन्नप्रतियोगिताकतादृशाभावस्यैव हेतुत्वोपगमेन ज्ञानादेः समवायसंबंधेनाव्याप्यवृत्तित्वेपि रामः
स्वसमानाधिकरणैकत्वसंबंधेनाव्याप्यवृत्तितयोक्तापत्तेरसंभवात् न च कायव्यूहस्थले एकशरीरावच्छेदेन तस्मिन्नेवात्मनि साध्यनिर्णयसत्वेनुपदर्शितसाध्य
निर्णयाभावस्यासत्वेन शरीरांतरावच्छेदे नाप्यनुमितेरनुदयप्रसंग इति वाच्यं· कायव्यूहस्थले तस्मिन्नेवात्मनि एकशरीरावच्छेदेन साध्यनिर्णयसत्वेऽन्यश
रीरावच्छेदे नापि स्वानुमितेः स्वात्रेव प्रमाणाभावात् तत्तच्छरीरावच्छिन्नत्वस्यानायत्याकार्यतावच्छेदककोटौ कारणतावच्छेदककोटौ च निवेशनोपदर्शि

दोषाभावाच्च । वस्तुतस्तु । आत्मनिष्ठप्रत्यासत्त्या यद्दर्शितरीत्या साध्यनिर्णयाभावस्यानुमितिहेतुत्वकल्पने विशेष्यतावच्छेदकनिवेशेन तद्भेदेन कार्यकारणभावबा
हुल्यमिति विशेष्यतावच्छेदकमनिवेश्य वह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमितित्वावच्छिन्नं प्रति वह्नित्वावच्छिन्नप्रकार
तानिरूपितविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकनिर्णयत्वावच्छिन्नप्रतियोगिताकाभावत्वेनैव प्रतिबंधकत्वकल्पने लाघवात् । नन्वेवं तत्कल्पेऽपि एक
पुरुषीयसाध्यनिर्णयदशायां पुरुषांतरस्यानुमित्यनुदयापत्तिवारणाय कार्यकारणतावच्छेदककोटौ तत्तत्पुरुषीयत्वनिवेशात्पुरुषभेदेन कार्यकार्यकारणभावबा
हुल्यापत्तिरिति वाच्यं । विशेष्यतावच्छेदककोटौ ह्रपाघुरुधाणमल्पतरत्वेन पुरुषभेदेन कार्यकारणभावबाहुल्यस्याकिंचित्करत्वात् । आत्मनिष्ठप्रत्या
सत्तिकल्पेऽप्युपदर्शितरीत्या तत्तच्छरीरावच्छिन्नत्वनिवेशस्यावश्यकत्वाच्च । यत्तु तथा सत्यतीतानागततत्तद्रूपाद्यवच्छिन्नविशेष्यताकानुमितेर्विशेष्ये तावच्छे
दकतासंबंधेन तत्तद्द्यादावनुदयप्रसंगः । तत्र कार्याव्यवहितपूर्वक्षणावच्छेदेन तादृशसाध्यनिर्णयाभावघटितसामग्र्या असत्त्वात् । न च निरवच्छिन्नविशेष्य
तावच्छेदकताकस्थलेऽपि विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कार्यकारणभावः रूपत्वावच्छिन्नरूपादिनिष्ठविशेष्यतावच्छेदकताकस्थले तु रूपत्वादिविशेष्य
तावच्छेदकतावच्छेदकनिष्ठप्रत्यासत्त्यैव कार्यकारणभावः कल्प्यत इत्यतो नानुपपत्तिरिति वाच्यं एवमप्यतीतरूपाद्यात्मकतत्तायत्तस्वरूपतादि विशेष्यतावच्छेदि

कातत्त्वनिष्ठविशेष्यतावच्छेदकताप्रत्यासत्त्यैव कार्यकारणभावसंभवेनोक्तानुपपत्तितादवस्थ्यादिति। तं न तावतानायासात्तत्र धर्मितावच्छेदकं निर्वश्यानन्तमिद्ध
३१ प्रत्यासत्त्या सा सा अनिर्णयाभावस्य हेतुत्वकल्पनेऽप्यन्यत्र सर्वत्रोक्तार्थेवेन धर्मितावच्छेदकनिष्ठप्रत्यासत्त्यैवोपपन्नतानुमितेः। कार्यकारणभावकल्पने न्यायोचित्या
त्तस्याधिकमत्रानुसंधेयम्। न चास्तु सिद्ध्यभाव एवानुमितिहेतुर्न तु विशिष्टाभावः सिषाधयिषोत्तेजकत्वप्रयोजनविरहात्। न चैवं सिषाधयिषाधीनानुमितौ व्यभिचार
इति वाच्यं। स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबन्धेन सिद्धिविशिष्टान्यत्वस्य कार्यतावच्छेदकत्वोपगमादेव व्यभिचारवारणसंभवात्। न
चैवं सति सिषाधयिषाकालीनानुमितेः सिद्ध्यभावजन्यतानवच्छेदकानाक्रान्ततया तादृशानुमितिसामग्र्याः सिषाधयिषाविरहविशिष्टसिद्धिकालेऽपि सत्त्वात्त
दानुमित्यापत्तिरिति वाच्यं। सिषाधयिषासिषाधयिषाविशिष्टानुमितौ सिषाधयिषाया हेतुतान्तरस्य कल्पनीयतया सिषाधयिषाकालीनानुमितिसामग्र्याः सिषाध एमः
यिषाघटितत्वेन सिषाधयिषाविरहविशिष्टसिद्धिकालेऽसत्त्वेनापादनासंभवात्। न च कार्यकारणभावद्वयकल्पनापेक्षया विशिष्टाभावस्यैक हेतुत्वकल्पनमे
वोचितमिति वाच्यं। विशिष्टाभावस्य हेतुत्वकल्पेऽपि सिषाधयिषाया विरहविशिष्टसिद्ध्यभावस्य सिद्धिविशिष्टाभावसिषाधयिषाविरहरूपाभावस्य वा हेतुत्वमित्य
त्र विनिगमनाविरहेण कार्यकारणभावद्वयस्य दुरवच्छेदकगौरवाधिक्यमाक्षेपात्। तत्रः एतत्कल्पे स्वाव्यवहितोत्तरत्वादिसंबन्धेन सिद्धिविशिष्टान्यत्वस्य का

र्यतावच्छेदकत्वेगौरवेणानन्तरये न्नविशिष्टाभावहेतुत्वकल्पनस्यैव समीचीनत्वात्॥ न च विशिष्टाभावस्य हेतुत्वकल्पनेपि स्वसमानलिंगकेच्छाकालीनोभयलिंगक
समूहालंबनात्मकपरामर्शजन्यानुमितौ व्यभिचारवारणाय यावद्वह्नित्वादिसंबंधेन तत्तल्लिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टविशिष्टाभावत्वस्य कार्यतावच्छे
दकत्वमावश्यकमेवेति वाच्यं तस्याः कार्यतानवच्छेदकत्वेपि तत्र व्यभिचारवारणस्य वक्ष्यमाणत्वाद्दिष्वपि दर्शितरीत्या संभवेन विशिष्टाभावहेतुत्वकल्पने तादृशसि
द्धिविशिष्टाभावस्य कार्यतावच्छेदकत्वानुविशेषकत्वादित्यलमत्याविस्तरेण॥ यत्तु॥ अनुमितिविषयकेच्छाभावविशिष्टसिद्ध्यनुमितित्वप्रकारकेच्छाविरहवि
शिष्टानुमित्यनुसिद्धिसामग्र्योरन्यतरत्वावच्छिन्नाभाव एव व्यस्तताले नैवानुमितिप्रतिहेतुत्वं स्वीक्रियते न तु सिषाधयिषाविरहविशिष्टसिद्धित्वावच्छिन्नाभा
वत्वेन॥ तथा सति प्रसक्तादिसामग्रीदशायामनुमितिवारणाय तादृशसामग्र्यभावस्यातिरिक्तकारणत्वकल्पनायत्ते॥ न चानुमितिविषयकेच्छाभावस्यान्यतरत्वा
वच्छिन्न एकधारेवाविशेषत्वारहृपनिवेशोव्यर्थ इति वाच्यं॥ तत्रानुमितिविषयकेच्छात्वावच्छिन्नप्रतियोगिताकाभावनिवेशपर्यवेतो वह्निमानिति प्रत्यक्षादिसा
मग्रीकालेवह्निज्ञानं जायतामितीच्छासत्वेनुमित्यापत्तिः तत्र वह्निप्रत्यक्षान्यारेनैवेच्छाविषयसिद्धेः प्राप्तेरसंभवात् तन्मनुमितित्वप्रकारकेच्छाभावनिवेश
यवेतो वह्निमानिति सिद्धिकालेवह्निज्ञानं जायतामित्याकारकेच्छासत्वेनुमितेरनुपपत्तिरिसुपदर्शितैरीत्यानुमितीच्छाभावस्यवारद्वयनिवेशस्यावश्यक

त्वादिति। नन्वेवमनन्तरत्वघटकसिद्धिभेदेन तादृशसामग्रीभेदयोः परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यकल्पनेन गौ
३२ रवप्रसंगेन कारणतावच्छेदकगौरवप्रसंगेन चानुमितिं प्रति तथाविधसिद्ध्यभाववत्त्वेन तथाविधप्रत्यक्षादिसामग्र्यभाववत्त्वेन च पृथक्कारणताकल्पने सैव सम्य
क्, त्वात् सिद्ध्यभावस्य विशेष्यतावच्छेदकनिविष्टप्रत्यासत्त्यादेरनुक्तेन तादृशसामग्र्यभावस्य च विधेयनिविष्टत्वे गुरुत्वेनोपदर्शितत्वात्। एकहेतुतायाः असंभवाच्च व
स्तुतस्तु तादृशसिध्यभाववत्त्वेन तादृशसामग्र्यभाववत्त्वेन च स्वतन्त्रान्वयव्यतिरेकानुविधानात् तत्र कारणत्वकल्पनमावश्यकम्। एवम् यथा बाधादिकमप्यन्त
र्निवेश्यानुमितिप्रतिबाधादिसिद्धप्रत्यक्षादिसामग्र्यन्यतमत्वावच्छिन्नाभावस्यैव कारणतायां बाधाभावादेरप्यनुमितिप्रति स्वातन्त्र्येण कारणत्वानुप
पत्तेः न चैवं संगतं तादृशान्यतमत्वावच्छिन्नाभावस्यैककार्यतावच्छेदकसंभवात्। न च पर्वतविशेष्यकवह्निविधेयकानुमितित्वमेतित्वमेव तत्कार्य
तावच्छेदकमितिवाच्यं। वह्नीमान् पर्वतो घटवानित्याद्यनुमितेर्वह्निविधेयकत्वाभावेन बाधाभावकार्यतावच्छेदकानाक्रान्ततया पर्वतो वह्निवानिति बाध
कालेपि तदापत्तेः। न च पर्वतविशेष्यकवह्निप्रकारकानुमितित्वमेव तत्कार्यतावच्छेदकं वाच्यं। तथा च नोक्तापत्तिरिति वाच्यं। तथा सति वह्निमान् पर्वतो घटवानि राम:
त्याकारकानुमितेः पर्वतो वह्निमानित्याकारकसिद्ध्यभावकार्यतावच्छेदकानाक्रान्ततया तादृशसिद्धिकाले तादृशानुमितेरनुदयापत्तेः। मैवं। उक्तरी

त्वायर्वतोवह्निमाव्वावनित्यादिबाधघटितान्यतमत्वावच्छिन्नभावत्वेन कारणत्वासंभवेपि पर्वतविशेष्यकवन्ह्यनुमितित्वावच्छिन्नं प्रतिघटादिव्याप्याभाव
वन्निष्ठविशेष्यतानिरूपितघटादिव्याप्यप्रकारताशालिज्ञानकालीनपर्वतो वन्ह्यभाववान्वन्ह्यभाववन्निष्ठविशेष्यतानिरूपितसंबंधावच्छिन्नवह्निप्रकारता
शालिज्ञानकालीनपर्वतोवन्ह्यभाववानित्यादिबाधघटितान्यतमत्वावच्छिन्नाभावस्य कारणत्वसंभवात् नन्तूक्तबाधकाले वह्निमान्पर्वतो घटवानित्यनुमित्य
पपत्तिः संभवति ताद्दशबाधकाले घटव्याप्यवान्वह्निमान्पर्वत इत्याकारकपरामर्शेऽत्राप्रामाण्यज्ञानस्यावश्यकतया प्रामाण्यज्ञानाभावविशिष्टपरामर्शस्य का
रणाविरहादेतत्व्यापत्त्यसंभवात् नचतादृशबाधस्य वन्हिविधेयकानुमितिप्रतिबंधकतया नोक्तरीतिसंभवतीति वाच्यं पर्वतत्वावच्छेदेन पर्वतो वह्निमानित्यनुमि
तिं प्रति नीलपर्वतो वन्ह्यभाववानित्यादिबाधबुद्धेरिव ताद्दशबाधबुद्धेरपि ताद्दशानुमितिप्रतिबंधकत्वसंभवात् एतेन मिलितबाधान्तराभाव एव प्रसंतात
च्या वानुमितिं प्रति तद्विशेष्यकसाध्यनिर्णायकसाध्याभावनिर्णायान्यतरत्वावच्छिन्नाभावस्य हेतुत्वकल्पनेन बाधाभावस्य स्वातंत्र्येणानुमितिप्रतिहेतुत्वाकल्प
नेन लाघवात् न चैवं केवलान्वयिवाच्यत्वादिसाध्यकानुमितौ व्यभिचारः तत्र साध्याभावाप्रसिद्धात् वृत्तिनोक्तरूपान्यतरत्वाभावात् नन्तु प्रतियोगितासंबंधा
वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताशालिनिर्णयरूपबाधघटितत्वताद्दशाभावेपि वसर्वत्र पक्षतात्वं संभवति

केवलान्वयिसाध्यके कमात्मकत्वादृशाबाधप्रसिद्ध्यादोषाभावादितिवाच्यं॰ साध्यतावच्छेदकातिरिक्तसंबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नसाध्यता
33 वच्छेदकावच्छिन्नप्रकारतानिरूपिताभावप्रकारतानगालिनिष्ठ्वपवारणाय साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यप्रकारतानिरूपिताभाववत्वावच्छिन्नप्रकारताश
लिरर्तीयरूपबाधस्यैवपक्षतावच्छेदकत्वोपगमस्यावश्यकतया केवलान्वयिसाध्यकस्थले साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्ध्यातथावि
धबाधाप्रसिद्ध्यात्तद्घटितपक्षतायास्संभावस्यदुर्वारत्वात्॰ नचैवंग्रीवादिमत्त्वादिगुरुधर्मावच्छिन्नसाध्यकस्थलेपक्षतासपत्वंर्थसाध्यतावच्छेदकावच्छि
न्नत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयत्वपक्षताघटकीभूतबाधघटिकावक्तव्या कंबुग्रीवादिमत्वादिगुरुधर्मावच्छि
न्नसाध्यकस्थले च तादृशविषयताप्रतियोगित्वांशे कंबुग्रीवादिमत्वाद्यवच्छिन्न भ्रमात्मककंबुग्रीवादिमान्नास्तीतिज्ञानीयाप्रसिद्धा॰न्न तोनत्तत्पक्षताहानिः
एवंचकेवलान्वयिविवाच्यत्वादिसाध्यकस्थलेपित्तद्रूपसंबंधावच्छिन्नप्रतियोगित्वांशेवाच्यत्वत्वाद्यवच्छिन्नत्वभ्रमात्मकवाच्यत्वंनास्तीत्याद्याकारकज्ञानीयतथा रामः
विधविषयताप्रसिद्धान्नतत्पक्षताहानिरितिवाच्यं॰ सांसर्गिकविषयतायाप्रकारतात्वविशेष्यतात्वानभ्युपगमेनप्रतियोगित्वसंबंधांशेकंबुग्रीवादिमत्त्वाद्यवच्छि
न्नत्वभानाप्रसिद्ध्यातथाविधसांसर्गिकविषयतायाअप्रसिद्ध्यापक्षताघटकबाधघटकत्वासंभवेनकंबुग्रीवादिमत्त्वादिरूपधर्मावच्छिन्नसाध्यकस्थलेपक्षता